CC-0. In Public Domain. Digitization by eGangotri

8.1

षोडशी

ṢOḌAŚĪ

AN ANTHOLOGY OF CONTEMPORARY SANSKRIT POETS

साहित्य

SAHITYA AKADEMI

Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Ṣoḍaśī, compiled and edited by Professor Radhavallabh Tripathi, is an anthology of seventy-eight poems by sixteen modern Sanskrit poets hailing from the various regions of this country. The anthology contradicts the general notion that Sanskrit is an ancient time-hallowed language but hardly suitable for dealing with contemporary themes and situations. The poems included in this volume are distinguished by originality of thought, richness of expression and freshness of approach to the subject which mark *Ṣoḍaśī* out from other anthologies in Sanskrit. The evocative language of its poetry, coupled with the quality of its expression affirm that literature and music are inextricably linked together.

Price: Rs. 100

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

षोडशी

ṢOḌAŚĪ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अन्तरावरणपत्रयोर्मुद्रिते भास्कर्यप्रतिचित्र आलिखितं दृश्यम्—त्रयो ज्यौतिषा नृपतये शुद्धोदनाय बुद्धजनन्या राज्ञ्या मायादेव्या दृष्टस्य स्वप्नस्य तात्पर्यं व्याचक्षते। तदधः कश्चिल्लेखकस्तत् तात्पर्यव्याख्यानं पुस्तमारोपयति। संभाव्यते यदेतदेव भारतवर्षे लिपिकौशलस्य प्राचीनतमं चित्रार्पितं निदर्शनमिति।

नागार्जुनीकोण्डातः (क्रैस्तवद्वितीयशताब्दी)।
नवदेहलीस्थ-राष्ट्रियसंग्रहालय-सौजन्यात्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

षोडशी

(समकालिकसंस्कृतकाव्यसंग्रहरूपा)

श्रीराधावल्लभत्रिपाठिना

संकलिता सम्पादिता च

साहित्य अकादेमी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ṢOḌAŚĪ

(An Anthology of Contemporary Sanskrit Poets)

Edited by

RADHAVALLABH TRIPATHI

SAHITYA AKADEMI

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Ṣoḍaśī: an anthology of contemporary Sanskrit poets
compiled and edited by Dr. Radhavallabh Tripathi.
Sahitya Akademi, New Delhi (1992) Rs. 100

© Sahitya Akademi
First Edition 1992
ISBN 81 7201 200 4

Sahitya Akademi, Rabindra Bhavan,
35, Ferozeshah Road, New Delhi 110 001.

Sales Section
"Swati", Mandir Marg, New Delhi 110 001.

Regional Offices
Jeevan Tara Building, 23A / 44 X, Diamond Harbour Road,
Calcutta 700 053

172, Mumbai Marathi Grantha Sangrahalaya Marg,Dadar,
Bombay 400 014

ADA Rangamandira, 109, J.C. Road, Bangalore 560 002.

Price Rs.100

Published by Sahitya Akademi, New Delhi 110 001 and printed
by Neographics, 2/7 Ansari Road, Daryaganj, New Delhi 110 002.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विषयानुक्रमणिका

ACKNOWLEDGEMENTS xi
INTRODUCTION xiii
SELECT BIBLIOGRAPHY xxi

POEMS १-१६३

वेङ्कटरामराघवः १-१३
1. किमिदं तव कार्मणम्? ३
2. अन्यापदेशाः ३
3. अयोगयोगः ६
4. वाग्वादिनी सहस्रतन्त्री ११
5. पुलकमेति कश्चित् कविः १२

वीरेन्द्रकुमारभट्टाचार्यः १५-२१
6. तनुतीर्थम् १७
7. आविर्भावः १७
8. हतसर्वस्वः १८
9. युगकविः १९
10. मेघदूतम् २०
11. वर्षाललन्तिकाः २०

बटुकनाथशास्त्री खिस्ते २३-३४
12. वसन्तविभावरी २५
13. जयत्यसौ वसुन्धरा २६
14. भागीरथीपद्यपुष्पाञ्जलिः २८
15. आत्मनिवेदनम् ३०
16. प्रभातलक्ष्मीः ३१
17. कृष्णमेघः ३२
18. शरदिन्दुमुखी ३३

रतिनाथझा ३५-४४
19. घनं प्रति ३७
20. सुभाषितानि ३९
21. मेघमाला ४१
22. कौमुदी ४१
23. मुक्तिवाहिनी ४२

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

24. हिमागमः ४३
25. चन्द्रः प्रवालप्रभः ४४

मधुकरगोविन्दमाईणकरः ४५-५३
26. स्मृतितरङ्गम् ४७
27. गायिकाशिल्पकारम् ५०
1. निष्कासनम् ५०
2. निवेदनम् ५०
3. निश्चयः ५१
4. विरहाकुलत्वम् ५२
5. नैराश्यम् ५२
6. समापनम् ५३

उमाशङ्करशर्मत्रिपाठी ५५-७४
28. अस्पृश्यान्तर्निवेदितम् ५७
29. चक्रिचूडामणिः ६०
30. कृषकः ६६
31. मधुकर ! ते दिवसा विगताः ६८
32. सैन्यप्रयाणम् ६९
33. वसन्तः ७०
34. युद्धवर्णनम् ७२

श्रीधरभास्करवर्णेकरः ७५-८६
35. रामदासः ७७
36. जिजा ७९
37. निदाघः ८०
38. श्रममाहात्म्यम् ८३
39. श्रमयोगः ८५

रेवाप्रसादद्विवेदी ८७-१०२
40. प्रतीक्षा ८९
41. सीतापरित्यागः ९०
42. सीताप्रस्थानम् ९४
43. सीतामहाप्रयाणम् ९५
44. शिवचतुर्दशी ९८
45. मातुः स्तुतिः १००

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

के. राजन्नशास्त्री ९०३-१०८

46. सायम् १०५

47. बलिपुष्टविलसितम् १०६

48. परपुष्टदशकम् १०७

जगन्नाथपाठकः १०९-११६

49. मेघमाला १११

50. किञ्चिद् विकीर्णमुच्छ्वसितम् १११

51. धीराः क्षणम् ११३

52. कापिशायनी ११३

53. गझलगीतम् (१) ११४

54. गझलगीतम् (२) ११५

55. रुबाईगीतानि ११६

रामकरणशर्मा ११७-१२४

56. न वेद्मि तावत् किमहं प्रतीक्षे ११९

57. अमूर्तं किमप्यस्ति मित्रं मदीयम् १२०

58. कविर्बुभूषामि १२२

59. जिज्ञासा मे जायतां नावबोधः १२३

राजेन्द्रमिश्रः १२५-१३०

60. मुषितस्तथापि वरानने ! १२७

61. आलोचयन्ति येऽपरम् १२८

62. वाचिकं ददे कस्मै १२८

63. को नु भणतु महिमानम्? १२९

रसिकविहारीजोशी १३१-१३९

64. करुणाकटाक्षलहरी १३३

65. भक्तिः १३४

66. कामः १३६

67. निर्वेदः १३८

श्रीभाष्यम् विजयसारथिः १४१-१४८

68. मन्दाकिनी १४३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हर्षदेवमाधवः १४९-१५५
69. अन्धकारः १५१
70. वृक्षाः १५२
71. चतुष्के कवेः प्रतिमां दृष्ट्वा १५२
72. अत्रान्तरे १५३
73. उष्ट्रः १५३

केशवचन्द्रदाशः १५७-१६३
74. प्रतीक्षा १५९
75. विहङ्गमः १५९
76. समाधिः १६०
77. प्रभातपतत्रिस्वरः १६२
78. आस्वादः १६२

APPENDICES 165-177
Biographical Sketches of the Authors 165
Books and Periodicals Consulted 173
Sources of the Poems 175

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ACKNOWLEDGEMENTS

I am grateful to the Sahitya Akademi, New Delhi, for providing me with an opportunity to study contemporary Sanskrit writings. Thanks are due to Dr. R.C. Dwivedi, Professor of Sanskrit, Rajasthan University; to Dr. V.N. Jha, Director, CASS, Poona University; to Dr. H.P. Malledevaru, Professor of Sanskrit, Mysore University; to Dr. Shivadatta Sharma Chaturvedi and Dr. S.P. Vyas, Faculty of Oriental Learning, Banaras Hindu University and to all the authors included in *Ṣoḍaśī* for their suggestions and help in acquiring material. I am obliged to Dr. R.S. Pathak, Professor of English and Dr. H.S. Gour, University of Saugar, for having gone through the Introduction to this Anthology.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

INTRODUCTION

The present Anthology comprises 78 Sanskrit poems or excerpts thereof by a total number of sixteen authors. These poems were first brought out between the years 1960 and 1980. It has not been an easy task for me to select representative Sanskrit poets who appeared on the scene during the last two decades, and to cull out the best of their creative work produced during this period. The reasons are obvious. Sanskrit is known for its classical literature, eventhough the creative activity in this language has continued without pause from the medieval age till today. Sanskrit is generally recognised as the language of the Vedas, the Puranas and the great classics of yore. Consequently, contemporary Sanskrit writing suffers from a prevailing negligence.

On the other hand, the number of authors who appear to be very enthusiastic about writing in Sanskrit during these days is not negligible. During the period under reference, quite a few collections of poems or epic poems *(mahākāvyas)* in Sanskrit have appeared. There has been a continuous flow of publications in book form by contemporary Sanskrit authors. But to understand the real vitality of modern creative writings, one should ideally go through the volumes of Sanskrit periodicals like *Sūryodaya* (Monthly), *Saṃskṛta Pratibhā* (Half yearly) and *Saṃvit* (Quarterly).

The potentiality of modern Sanskrit writings has its own relevance and basis in the contemporary scene. First, Sanskrit is a language—perhaps the only one in which scholars are equally spread in each and every part of this vast peninsula. That is why the poets included in this Anthology hail from various regions of the country. Secondly, in spite of the lack of publicity, there has been a continuous tradition of Sanskrit as a medium of communication. There has been, for example, a living tradition of Kavigoṣṭhīs (poets' meets) in Sanskrit. Kashi Pundit Sabha has been holding such goṣṭhīs for more than

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

a century. Sanskrit Kavi Sammelana were organised a number of times at Varanasi. Several societies or academic institutions at Varanasi have been holding sessions of poetry recitation by modern Sanskrit poets. In 1967, a society called Kavibhāratī was formed by the Sanskrit poets of Varanasi, who held fortnightly/monthly meetings for poetry recitation. The society brought out a journal *Lalitā* to publish Sanskrit poetry and also presented annual volumes of collections comprising poems recited in its meetings. Six volumes of such collections called *Kavibhāratīkusumāñjaliḥ* have already been brought out. Sanskrit Kavi Sammelana has become a regular feature of the Kālidāsa Samāroha held every year at Ujjain.

Undoubtedly, Sanskrit still continues to be a potential vehicle of thought and emotion and the creative activity in it is marked with exuberance and brilliance and should be treated at par with literatures being produced in other modern Indian languages.

Writing in a language that no more serves as a *lingua franca* amongst the masses probably poses a great challenge, and it is a severe handicap for the modern Sanskrit authors. But then, Sanskrit was not the language of the common people even in the best period of its creative activity, when great classical poets like Kālidāsa, Bāṇa, Bhāravi, Māgha and Bhavabhūti had created a world of poetry so pregnant with life, imagination and inspiration. The contemporary literary efforts in other Indian languages too have not been able to do away with the dichotomy between the word that is spoken and the word that is written.

It is true, nevertheless, that the antiquity of Sanskrit, its classical pattern and the association of its idioms and phrases with a mythological world as well as its most perfect grammatical structure bear heavily on the modern Sanskrit poets. The age-old language in which the great masters wrote with all its accomplishment and rigidity, is hardly suited for dealing with the contemporary situations, new themes or ethos of our times. Sanskrit authors, however,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

have been writing profusely in these decades, and the abundance of contemporary Sanskrit literature may appear to be amazing. Dr. Ramji Upadhyaya in his treatise on modern Sanskrit drama has discussed more than 400 Sanskrit plays written and published during the nineteenth and twentieth centuries.[1] In a thesis dealing with Sanskrit *mahākāvyas* written in a single decade, 1961–1970, the researcher has noted 52 Sanskrit *mahākāvyas* (epic poems) produced in that very decade, all of which except six had already been published then.[2] Sanskritist's fascination for writing *mahākāvyas*, the voluminous poems with several cantos and thousands of verses, still continues. S.B. Varnekar's *Śivarājyodayaṃ* (Rise of Shivaji's Empire : 1972) which won him the Sahitya Akademi Award, contains 3852 verses in 68 cantos.[3] *Kṣatrapaticaritaṃ* of Umashankar Sharma Tripathi, still more compact in poetic organisation, also deals with the same theme in 2293 verses in 19 cantos.[4] More and more Sanskrit *mahākāvyas* dealing with Puranic themes as well as with the lives of national leaders or religious heads like Gandhi, Nehru, Subhash Bose, Vivekananda have been coming out. A tendency to imitate the classics continues to characterise them. One comes across occasional touches of brilliant poetic imagery in them and the balance of sound and sense is maintained along with the grandeur, elegance and chastity of the language. What is lacking is the scientific attitude, the milieu, the analysis of socio-political forces and the dilemma of the modern man and society. Unmoved and undetterred by the chaos and trauma of his age, the Sanskrit author by and large lives in his own ivory tower and weaves the inspiring tales of mythical and Puranic heroes belonging to old times or otherwise leaders and saints belonging to his own times,

1-2. See Bibliography at the end of this Introduction.
3-4. Portions from both these epic poems are included in this Anthology. See no. 32 to 37.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

who are also turned into some sort of mythical heroes in his work. When confronted with drab realities of contemporary life, he is carried over by a sense of helplessness and starts talking consequently in a language of over-simplification.

Today Sanskrit poets are generally teachers, i.e. pundits of *pāṭhaśālas*, or university professors. This may be a reason for the limited range and the lack of variety in contemporary Sanskrit writings. Curiously enough, all the poets represented in this Anthology have been serving as teachers throughout; B.K. Bhattacharya and Harshadev Madhav are exceptions to some extent. The former joined ICS after serving as a professor in a college for nine years; while the latter worked in a telegraph office for some time to support his family and to complete his studies, later on joined as a lecturer in a college. But then, the teachers of subjects other than Sanskrit have also substantially contributed to contemporary Sanskrit writings. Dineshchandra Datta, professor of English literature at Jaipur, is known to have published several poems in Sanskrit. So are Bhattacharya and Umashankar Sharma Tripathi of this Anthology. The former was professor of philosophy and the latter that of English literature. Also, some of the authors who have enriched modern Sanskrit literature have kept themselves alive to the problems and perspectives of contemporary literature in other Indian languages and have equipped themselves with the knowledge of literary traditions outside India.

Despite the limitations and narrow range, Sanskrit offers possibilities for experimentations and expansion in *belles lettres*. Considering its vitality and potentiality as a medium, a number of celebrated authors well-known for their contributions to other Indian languages have been writing in Sanskrit also. Nagarjuna, a famous Hindi poet, for instance, had started his literary career as a Sanskrit poet, and had produced *Leninaśatakaṃ* (one hundred stanzas in Sanskrit on the death of Lenin). He has lately revived his fascination for writing in Sanskrit, and has also recited his

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

new Sanskrit poems in the Kavigoṣṭhīs. Malayalam poet Kumaran Asan, Hindi poet Janakivallabh Shastri, Telugu poet Visvanath Satynarayan are some other literary figures who also preferred to write poetry in Sanskrit. Ambikadatta Vyasa, a prominent litterateur in the Bharatendu Circle of Hindi authors is widely known to the scholars and students of Sanskrit for his *magnum opus*, *Śivarājavijaya*, a Sanskrit novel. The way Sanskrit encaptures the urge for creative writing is even more explicit from the example of Sri Aurobindo. He had started his Sanskrit poem *Bhavānībhāratī* when working with the revolutionaries. The poem could not be completed and the manuscript was seized by the police. The manuscript containing 99 stanzas of this poem recovered lately is kept at the Aurobindo Archives, which provide a rare example of the aspirations and creative potential of the author of *Sāvitrī*, revealing the vision of Bhāratamātā as it appeared to the poet in a trance and his dilemma where the urge to work for the freedom of the motherland gets the upper hand.

Some of the authors selected in this Anthology are also known for their work in the languages other than Sanskrit. V.Raghavan has contributed to modern Tamil literature. Umashankar Sharma Tripathi has also published poems in Hindi and English. B.K. Bhattacharya had produced several collections of Bengali poems before he decided to adopt Sanskrit as his medium. Jagannath Pathak has a variety of publications in Hindi. But Sanskrit remains the choicest medium for all of them.

This age-old language has thus attracted the best creative talents and its rich literary traditions have inspired many authors and provided nucleus for new creative activity. In no other language, perhaps, the link with classics and classical metres and forms is as intact and strong as it is in Sanskrit. This fact is of great significance when we find the great literary traditions and traditional forms and classics are largely sinking into oblivion for the new generations of writers in modern Indian languages.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

It may also be noted that Sanskrit is wonderfully receptive to new trends. If we find authors aspiring to write in the vein of Māgha or Śrīharṣa, we also find authors breaking new grounds or evolving new patterns in contemporary Sanskrit literature. Bhatta Mathuranath Shastri (1889-1964) was a pioneer figure in this regard. He had the honour for initiating creation in various new genres in modern Sanskrit literature. He wrote short stories, fine essays and radio-plays in Sanskrit and adopted the metres of Braja and Hindi. He also composed a large number of *ghazals* and even went to the extent of writing *ṭhumrīs, dādrā* or *dhrupada* songs in Sanskrit.

Now we come to the poets who prominently figure in this Anthology. Dr. V. Raghavan was a prolific writer and an extra-ordinary scholar. He travelled extensively in the continent. The influence of English romantic poems can be traced in some of his poems.[5] Poets like Batuknath Shastri Khiste and Ratinath Jha have stronger affiliations to the classical tradition. They do write on contemporary themes, but the treatment of the subject and the language and diction confirm their devotion to classical moulds.[6] Both these poets belong to the Varanasi School and have been active members of the Kavibhāratī group mentioned earlier. Several of their poems are on identical themes, having been composed to meet the requirements of *samasyāpūrti,* a fill-in-the-blank type of metrical exercise which has remained very popular with the Sanskrit poets all along. Both of them have enviable command over the language and have introduced new themes. We find Ratinath Jha composing verses on Mujib's Muktivāhinī which fought for the liberation of Bangladesh. Poems of Umashankar Sharma Tripathi reveal a better understanding of the emerging social patterns and new consciousness. His *Aspṛśyāntarnivedita* (monologue of the

5. See no. 1-5 in this Anthology.
6. See no. 12 to 25 in this Anthology.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Untouchable) expresses the sufferings of the down-trodden revealing the impact of Gandhian ideology. *Kṛṣaka* (The Farmer) is a faithful appraisal of the socio-economic conditions.[7] *Śramagītā* of Shridhar Bhaskar Varnekar is another example of the dominating influences of Gandhism.[8] Patriotism and the spirit of National freedom movement continue to influence these poets.

The poetry of Ramkaran Sharma[9] is imbued with Indian ethos and traditions. His Sanskrit lyrics vibrate with an eternal longing for the Infinite, pervaded by the poet's solitude and mystic feelings. He also appears to submit to Vedanta philosophy and religious faith. Some of his poems bring out the crisis of values and trauma of modern age. Simplicity of expression is the mark of his writings.

Rajendra Mishra[10] has experimented with various new forms in his Sanskrit writings. He has been popular for his *ghazals* or songs based on folk metres in Sanskrit, like *kajarī* or *horī*. Stylistically also, his poetry covers a vast range revealing the grandeur of classical poetry and also the impact of modern idioms and phrases.

Rasikavihari Joshi[11] has revived rhythmic patterns of classical Sanskrit metres with force and vigour. His poetry is very rich in imagery and musical resonance of words. He has recast the Puranic episode of Saubhari in his *Bhakti* (previously *Mohabhaṅga*, no. 63) administering a tinge of modernity. His *Karuṇākaṭākṣalaharī*, an invocation to Rādhā, full of devotion, can be ranked with the best of the Stotra-literature in Sanskrit.

7. See no. 28-30 in this Anthology.
8. See no. 38-39 in this Anthology.
9. See no. 57-57 in this Anthology.
10. See no. 58-61 in this Anthology.
11. See no. 62-65 in this Anthology.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

It is with the poets like B.K. Bhattacharya,[12] M.G., Mainekar[13] and Jagannath Pathak[14] that we find a different sensibility being inculcated into the realm of Sanskrit poetry with fresh approach and authenticity of experience. Mainekar made an attempt to introduce elegy in Sanskrit poetry. His *Smṛtitaraṅga* (no. 26) is modelled on the well-known elegies of English and Marathi and also relives the pathos of *Meghadūta* or the lamentations of Aja or Rati in Kālidāsa. Revealing the saddest of thoughts with tender feelings as expressed by a bereaved husband, this poem is set in modern environment, interwoven with the atmosphere of a typical middle-class Indian family. It is really a fitting tribute to a life-partner and a celebration of conjugal love through memories. In his *Gāyikāśilpakāraṃ* (no. 27), Mainekar tries to introduce sonnet. In fact pioneer in this field was B.K. Bhattacharya who seriously took up to writing sonnets in Sanskrit and also published *Kalāpikā*, a collection of his sonnets. He has successfully evolved his own metres and rhyme to coalesce in the Shakespearean and Petrarchan forms of sonnet. He also discovers new sentiments for his sonnets. Poetry of Jagannath Pathak who won the Sahitya Akademi Award for his *Kāpiśāyanī*, is obviously inspired by Omar Khayyam. For past three decades, Pathak has made a sustained effort to relive and recreate the spirit, beauty and imagery of Persian and Urdu poetry harmonizing them in our cultural milieu and traditions of Sanskrit poetry. Despite extensive use of the symbols which are identified with Persian literary tradition, his poetry is essentially embedded in the canons of Sanskrit.

The tendency towards fruitful experimentations and combining the old and the new is thus a mark of the poets of *Ṣoḍaśī*. There are other poets who have maintained an extreme orthodox outlook and rigidity, while there are

12. See no. 6-11 in the Anthology.
13. See no. 26-27 in the Anthology.
14. See no. 49-55 in the Anthology.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

others going to quite another extreme in their enthusiasm for breaking new grounds. There is one Ogetti Parikshit Sharma for example who having produced a *mahākāvya* and a collection of lyrics modelled on the *Gītagovinda* of Jayadeva, also writes folk-songs, fishermen's songs and even disco-dance songs in Sanskrit.

Coming to the poets of this Anthology again, we find satire on socio-political situations in two of the poems by K. Rajanna Shastri.[15] Sribhashyam Vijayasarathi[16] has instilled the resonance of folk-songs and folk-metres of Telugu in Sanskrit. The two young poets represented here who deserve more serious attention are Keshab Chandra Dash[17] and Harshadev Madhav.[18] Dash has taken exclusively to blank verse for his poetic compositions with a sustained and conscious effort to absorb the modern sensibility and the new trends emerging out of contemporary poetry in other languages. Harshadev appears to be more daring. He has introduced Japanese Haiku and Tanka and Korean Cizo along with the symbolic and surrealistic tendencies in Sanskrit poetry.

Traditions and modernity are going on hand in hand in contemporary Sanskrit poetry. The efflorescence vibrates with immense possibilities. *Ṣoḍaśī* will hopefully illustrate the beauty, possibility and potentiality of contemporary Sanskrit poetry.

RADHAVALLABH TRIPATHI

15. See no. 46-48 in the Anthology.
16 See no. 66 in the Anthology.
17. See no. 72-76 in the Anthology.
18. See no. 67-71 in the Anthology.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

SELECT BIBLIOGRAPHY

1. Dwivedi, R.V.: *Arvācīna-saṃskṛta-mahākāvyānuśīlanam* (Sanskrit), Sanskrit Parishad, Univ. of Saugar, Sagar, 1980.
2. Raghavan, V.: "Sanskrit Writings in the First Half of this Century", *JAS*, IX, 3-4, 1967.
3. ——: "Sanskrit Literature (1700-1937)", *JL. of Madras Univ.*, Centenary No.
4. ——: Sanskrit in Contemporary Indian Literature, Sahitya Akademi, New Delhi, 4th ed. 1981.
5. Shukla, Hiralal: *Renaissance in Modern Sanskrit Literature,* Alok Prakashan, Raipur, 1967.
6. Tripathi, Radhavallabh: "Creative Writing in Sanskrit", *Indian Literature,* 1975.
7. ——:"Saṃskṛtasahitye' bhinavonmeṣaḥ", *Sāgarikā*.XI 1.
8. Upadhyaya, Ramji: (Ed.) *Seminar on Modern Sanskrit Literature,* Sanskrit Parishad, Univ. of Saugar, Sagar, 1964.
9. ——: *Ādhunika Saṃskṛta Nāṭaka;* Part II; H.P., 1977.
10. Varnekar, S.B.: *Arvācīna Saṃskṛta Sāhitya* (Marathi), Modern Books Stores, Nagpur, 1963.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वेङ्कटरामराघवः

— किमिदं तव कार्मणम्?
— अन्यापदेशाः
— अयोगयोगः
— वाग्वादिनी सहस्रतन्त्री
— पुलकमेति कश्चित् कविः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किमिदं तव कार्मणम्?

सहकारवनस्पते चिरात् त्वा-
मभवं प्रष्टुमिदं सखे समुत्कः ।
प्रतिवर्षमिमानि पाण्डुपत्रा-
ण्यवधूनोषि दधासि नूतनानि ॥ १ ॥

किसलयानि मृदूनि मञ्जरीणा-
मपि यष्टीरलिसङ्कुला नवीनाः ।
दिवसैस्त्रिभिरेव शुष्कमुण्डा-
स्तव शाखा इह पत्रलाः समृद्धाः ॥ २ ॥

किमिदं तव कार्मणं यदक्ष्णोः
पुरतश्छोटिकयेव नूत्नमुर्व्याम् ।
प्रतिनिर्मितवानसि स्वमेवं
किमिदं मर्म ? रसस्त्वयीह को वा ? ॥ ३ ॥

(१९६७)

अन्यापदेशाः

ग्रीष्मव्योम्नि दिनावसानविगलत्सूर्यांशुकल्माषिताः
पाथोदा रटितस्फुटत्तटवियत्प्रान्ता अटां कुर्वते ।
तान् दृष्ट्वा किमु नीलकण्ठपरिषन् नृत्तोत्कतां विन्दते
नीपः फुल्लति किं, किमध्वगकुलं चौत्सुक्यतः स्पृश्यते ? ॥ १ ॥

अस्या अस्ति सुसङ्क्रमस्तटभुवि न्यग्रोधशीते स्थले
निःश्रेणी च शिलामयी निवसनप्रक्षालनायोपलः ।
मुद्रा चन्दनभूतिकुङ्कुमयुतो वाट्यां जपार्थं मठः
किं वैतैः सकलैश्च कश्चन न चेदन्तस्तटिन्यां रसः ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अर्चाम्येष सुमैः फलान्युपहराम्यच्छं पयः पीयतां
मन्दैर्गन्धवहैश्च शाद्वलतले विश्रामयाम्येष वः ।
एह्येहीति वनी द्विजैस्तरुशिरोरूढैः समुद्घोषय-
त्येषोऽहं प्रविशामि तां, पथि कुतः, कस्त्वं श्वदंष्ट्राभिधः[१] ॥ ३ ॥

हा अब्धे! कियतीह विस्तृतिरियं चापः कियत्यो भव-
त्येकस्यापि कणस्य नः शमयितुं शक्तिस्तृषं वर्तते? ।
इत्थं त्वां परिदूषयत्ययि मुहुर्लोकः किमालोकते
योऽभ्रो जीवनदः स जीवनमदो लेभे त्वदेवेत्यसौ ॥ ४ ॥

सत्यं दुस्सह एव घर्मकिरणस्तन्नाम विश्राम्यता-
दासंन्ध्यं सुखमत्र मौकलिकुलं छायासु नश्वत्वरे ।
तत्किं दूषयति स्थलानि पिशितैर्निष्ठ्यूतवान्तैरिदं
तच्चाप्यस्तु, कुतो नु बुद्बुदयति श्रोत्राणि काकारवैः ॥ ५ ॥

वृन्ते यान्ति पिपीलिकाः कतिपया रोहावरोहश्रमं
कीटाः केचन मूढमेव च दले स्वापं समातन्वते ।
केऽप्यन्ये शलभा विधूय वदनैस्ताम्यन्ति किञ्जल्ककान्
एकः केवलमेष सून! मधुपो लेढि त्वदीयं मधु ॥ ६ ॥

आमोदि प्रसवप्रपञ्चमसृजत् तन्मध्यतस्त्वामिति
त्वामेता न वतंसयन्ति ललना इत्येव वा किं क्षतम् ।
मर्तव्यं किमगन्धिता यदि सखे धत्तूर! वर्धस्व भो!
आदात्त्वामनु यः क्षयी, शतभिषङ्नाथस्स ते शक्तिवित् ॥ ७ ॥

रोहोऽपष्ठु परं, छदाः क्रकचवत्, कालाभ्रकोलाहले-
ष्वानन्दोत्सवमेषि किञ्च चपलासङ्गेषु सम्पुष्यसि ।
येनैवं गुणकोऽपि केतकितरो! प्रेयांस्त्वमेकेन न-
स्तस्मिन्नप्यथ ते सुमे न भवता निष्कण्टकं भूयते ॥ ८ ॥

१. लघुतीक्ष्णः कण्टकविशेषः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कश्चिद्धंस इतीर्यते शुचिरुचिर्नालैकवृत्तिर्द्विजो
माकन्दाङ्कुरजातपञ्चमकलः पक्षी पिकाख्योऽपरः ।
तादृक् कोऽपि न वीक्ष्यते खगवरः, किन्त्वद्य सर्वं जगत्
प्रेतक्रव्यपतद्रटत्करटकैराप्लाव्यते केवलम्॥ ९ ॥

यस्मादम्बुदवृष्टमम्बु सकलं योऽन्तेऽखिलायां गतिः
क्षुब्धोर्मिध्वनिरप्यपां पतिरसौ नैव स्वमुद्रातिगः ।
ये त्वेते तमुपानयन्ति कतिचिद् वृष्टं कदाप्यम्बुदै-
र्वृद्ध्यां पश्य कियांस्तटानभि नदैरेतैः प्रमाथः कृतः ॥ १० ॥

नित्यं चत्वरमत्यजन्त इह ये विष्ठादिभिर्दूषकाः
कर्णं बुद्बुदयन्ति नः स्म रटितैः सङ्केष्वटन्तोऽभितः ।
पिण्डं भूरि समर्प्य तद्गलमनुव्याहृत्य चाटून् बहू-
नाहूतेषु शिरोऽपि दर्शयति तेष्वेकोऽपि काकेषु न॥ ११ ॥

आरामेषु विलासियौवतसदस्युद्भिन्नमुग्धाङ्कुरा-
स्वादोन्मेषिपिकालिकाकलिकलान् दृष्ट्वा रसालद्रुमान् ।
रोहन् क्षेत्रमलावनावतिखरानुत्कीलयन् कण्टकान्
झिल्लीनुद्रटयन्नयं स मनुते बर्बूर आम्रं स्वकम्॥ १२ ॥

अन्योऽन्यं प्रतिघातमर्दनसमुल्लङ्घद्रुतोद्धावनैः
रे मूढाः! कुत एवमङ्ग किमिति स्पर्धा व ऊर्मिव्रजाः ।
एतां प्राप्य पयोनिधेस्तटभुवं निर्भर्त्सितानां पदा
फेनोद्गारमियं दशा तु करुणा निर्भेदमेकैव वः ॥ १३ ॥

रे रे वन्यमहीरुहाग्रविटपप्रान्ता ! मरुच्चोदिता
अन्योऽन्यासहनं किमेतदपि कः सङ्घर्ष एवं मिथः? ।
यस्त्वेतत्स्फुरदग्निरेभिरनलैः स्फारीकृतो घस्मरः
निश्शेषं निगिरेत् स वः कुलमहो सर्वं निमेषादिदम्॥ १४ ॥

अन्वागात् परिवार्य यं गजघटा शुण्डाङ्घ्रिभिश्चूर्णयन्
यो बभ्राम वनेषु यूथनृपतिः सोऽयं कथ सम्प्रति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नीतः पत्तनमस्य कीकटपथेष्वादिष्टरेखामनु
प्रस्पन्द्यङ्घ्रि नृकीटकैर्निगडितः शुण्डेन भो नीयते ॥ १५ ॥

फीट्कारस्स नभोविदारिगरिमा यातः कुतः साम्प्रतं
शुण्डः किं वनराज्यकालमृतिकृत् नैवाधिकं स्पन्दते।
यस्मिन्नुच्चलिते चकम्प पृथिवी सर्वा स एवैष किं
पादः? मन्दुरनागराज ! किमिदं, नीतोऽसि मार्जारताम् ॥ १६ ॥

यज्ज्ञातिच्छलमात्मपातकरणं यन्मन्दुराबन्धनं
यत्सीदन्ति कपोल एव च मदस्रोतांसि फल्ववध्वसु।
तत्तत्राशभिया स मन्दचलनं सर्वं न तन्मे शुचे
शीर्षाध्यासि नृकीटकाङ्कुशहतिस्त्वाघट्टते मर्मसु ॥ १७ ॥

व्याधेभ्यो यदि नैव रक्षसि, तदस्त्वस्माकमाक्रन्दितं
भूभृत्कन्दरकुम्भकर्ण! भवता नाश्रावि, तद्युज्यते।
अस्मानेव निहत्य भक्षयसि चेज्जाग्रद्दशा ते क्षणं
मुञ्चाद्यैव मृगेन्द्र, भो वनमृगान्, तुभ्यं त्रिसन्ध्यं नमः ॥ १८ ॥

त्वत्पत्रेष्विह वर्णसम्पदयि या सा नैव केकिन्यपि
त्वं देवस्य जयध्वजः, तव पुरस्ते तारकाद्याः क्व वा?।
कीर्त्यै कुक्कुट! किं न्वतस्तव कृपाधीनं प्रभातं, रवि-
र्भीकम्प्रः समुदेति कुड्यशिखरे पश्यंस्तवोड्डीनिकाम् ॥ १९ ॥

(१९७०)

अयोगयोगः

त्वच्चिन्तनावसर एव विलीनवृत्ति-
स्त्वद्भूत एष न हि किञ्चन चेतयेऽहम्।
तां द्वैतभूमिमतिलङ्घ्य हि वर्त एष
यत्रैव वाक् किमपि वर्णयितुं प्रगल्भा ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्वय्येव मग्नमनसो मम सर्वकालं
यत्सत्यमद्य न हि सङ्गवियोगभेदः ।
द्वैतं प्रवृत्तमधुना वपुरात्मनोर्मे
यत्र क्व वास्तु वपुरात्मगृहं त्वमेव ॥ २ ॥

त्वद्दर्शनक्षण उपागत एव नित्य-
मावेशवत् किमपि मां विवशीकरोति ।
कार्यं प्रदेशमपि दुस्त्यजमुद्विहाय
यावन्न तेऽन्तिकमुपैमि, शमो न तावत् ॥ ३ ॥

कार्येषु सत्स्वपि महत्सु सहस्रशो मे
यद्यप्यतीतसमये क्षणमेव वा त्वाम् ।
आलोक्य तीर्थलवपारणयेव चक्षु-
रुज्जीवयामि यदि नो भवितैतदन्धम् ॥ ४ ॥

अत्युत्तमासु कविवाक्षु च रस्यमाना-
सूद्गीतिषु श्रवणयोश्च सुधावहासु ।
लक्ष्मीषु चाक्षि विविधासु विलोभयन्ती-
ष्वप्रीतमस्ति तव चिन्तयदेव चित्तम् ॥ ५ ॥

प्रातस्समागतमतीत्य दिनान्तमत्र
यावत्क्षमं निशि विलम्बितमेव तावत् ।
अद्यापि गेहमभिगन्तुरकाण्ड एव
विच्छिन्नवन्मन इदं परितप्यते मे ॥ ६ ॥

सर्वां क्रियामुपरुणद्धि सदोदितं ते
ध्यानं, कृतो गलितसक्तिरहं परत्र ।
को दोष एष? सकला कृतिरात्मरक्ते-
रात्मा च निर्वृतिमिह त्वयि विन्दतेऽद्य ॥ ७ ॥

सत्यर्क एव दृश ईक्षितुमस्ति शक्ति-
रेवं च ते पुरत एव कृती जनोऽयम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्वत्सन्निधौ हि परभाग इवास्म्यधिश्री-
र्गानं, विना श्रुतिमिवास्मि विना त्वयाऽहम् ॥ ८ ॥

अक्लिष्टमेतदिव ते वदनं कुतोऽन्यद्
द्रक्ष्याम्यसौ परिचयश्च कयाऽन्यया स्यात् ।
शक्या तथाऽपि न मनोविवृतिश्च तत्त-
द्धेतोश्चरामि नियमं ध्रुवमासिधारम् ॥ ९ ॥

आशैव तोषयति तोषयतीह रागा-
भासोऽपि तोषयति चेत्सुनिमित्तमेव ।
साक्षात्तदेव यदि नौ भविता यदाहुः
प्रेमेति, तच्च भविता सखि किं कदापि ॥ १० ॥

आप्रातरानिशि कियन्तमनेहसं त्व-
त्प्रान्तैकवासरसमन्वभवं तदल्पम् ।
नैव स्थितं मयि; बताल्पवियोग एष
शून्यीकरोति हि निरादि निरन्तवन्माम् ॥ ११ ॥

नाद्राक्षमेव कवरीं न च संस्मरामि
किं वा धृतं वसनमाभरणं त्वयेति ।
अद्राक्षमेष विनिमेषकमेकमेव
त्वल्लोचनं यदधुनाऽप्यहमीक्ष एव ॥ १२ ॥

त्वन्नेत्रलीनकरणः करणं किमन्यत्
कुर्याम्, अहो तनुनि तत्र कियत्यतन्वी ।
लक्ष्मीर्भ्रुवं किमु पुटं किमु पक्ष्म किन्नु
तारां नु वीक्षणकलामुत किन्नु वीक्षै ॥ १३ ॥

ते वीक्षणं परमचार्विति चिन्तितं प्राङ्
मन्येऽद्य चारुतरमक्षिनिमीलनं ते ।
लक्ष्मीं नवां प्रतिपदं विवृणोषि काञ्चित्
विस्मारयत्यपि परा सुषमा च पूर्वाम् ॥ १४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गानं किमर्थमपि संलपनं किमर्थं
योऽत्यद्भुतो मधुरिमाऽस्ति दृशैव लेह्यः।
कण्ठे सुलेखिनि तवात्र करातिथेये
तच्चर्वणाविरतिरेव न भाविनीव॥ १५॥

एतावदिङ्गितविदां किमु नालमस्मा-
दस्माकमभ्यधिकमक्षममेव किञ्चित्।
लोकेऽपि काव्य इव सूक्ष्मपथव्रतानां
वाच्यं महद्धि सखि वाच्यनिषेवणं नः॥ १६॥

अस्त्वेवमेव फलबन्धनमन्दमस्म-
त्प्रेमाथवाऽस्तु सुतरां फलवन्ध्यमेव।
सिद्धेर्बिभेमि कुत एव तदा रसोऽयं
तीव्रो यमेष तनुतेऽस्मदयोगयोगः॥ १७॥

यन्नः प्रियादि सकलं प्रियमात्मनो हि
प्रेष्ठत्वतस्तदिति वेद उवाच मिथ्या।
आत्मा मम प्रियतमे प्रिय एष नूनं
त्वत्प्रेमपात्रमिति केवलमन्यथा न॥ १८॥

ज्योत्स्नापयः प्रलय आक्रमतेऽद्य लोका-
नन्तर्गृहं कथमवस्थितिरद्य शक्या।
याते बहिस्तु बहिरुद्गमनाय सज्जाः
प्राणाः, प्रिये तरसि पर्व कथं स्वमेतत्॥ १९॥

श्रद्धातुमेव न हि सुन्दरि हन्त शक्नो-
म्येतत् तवापगमनं, किमितो गतोऽसि?।
नातः परं तव विलोकनमप्यवाप्यं!
तच्चिन्तने पविरिवापतितोऽस्ति शीर्षे॥ २०॥

त्वत्पारवश्यमियदङ्ग ममेति वेद
नैतान्यहान्यहमितोऽद्य तवापयाने।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitization by eGangotri

यच्चित्तमप्रतिभमस्फुरणं च गात्रं
तच्चेतना त्वमसवस्त्वमभूः स्फुटं मे ॥ २१ ॥

आयाति मङ्गलदिनं समुपैति सन्ध्या
त्वद्दर्शनावसर एति, ततो न जाने ।
मामेति किन्विति; कथं प्रतिवारमायु-
र्गण्डं तमेनमतिजीवितुमुत्सहेऽहम् ॥ २२ ॥

किं मे मनस्त्वयि बभूव निबद्धमेवं
त्वां दृष्टवान् क इव निःशरणो भवेन्न ।
किं त्वामपश्यमथवा समवापि सख्य-
मेतावदप्यनितराप्यमिति प्रमोदे ॥ २३ ॥

त्वत्कारणात् प्रियतमे परितप्य इत्थ-
मित्यन्तरुत्स्फुरति कोऽपि मयि प्रमोदः ।
एतान्विलोक्य च विचिन्त्य च हर्षमेमि
वीराङ्कवत्क्रशिमपाण्डिमविक्लवान्मे ॥ २४ ॥

भूषापणे कटकमादधती यदा त्व-
मुत्सार्य चेलकमदर्शय एकपादम् ।
श्वेतं कपोतमिव चारु, तदापतद् यद्
भग्नं वपुस्तदधुनाऽपि ममोत्थितं न ॥ २५ ॥

सामान्यमुत्स्फुरति वस्तुषु वीक्ष्यमाणे-
ष्वेकैकमित्यरस एव स तर्कवादः ।
स्त्रीत्युक्त एव भवतीं प्रति धावतो मे
चित्तस्य भान्त्यनुभवास्तु विशेषकाष्ठाः ॥ २६ ॥

विश्लेषपूर्वदिवसे यदपूर्वमङ्गे
क्रूरे प्रसाधनकलां समदर्शयस्त्वम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रक्ताङ्कचेलमणिकङ्कणकादि तत्त-
दन्तर्निहन्ति परितश्चलशल्यवन्माम् ॥ २७ ॥

(१९७१)

वाग्वादिनी सहस्रतन्त्री

राकासुधाकरकरावलिनालिकाभि-
रावर्जितामृतझरैरिव वर्धितस्य ।
उत्तालताण्डवतरङ्गततेर्य एष
कोलाहलोऽम्ब जलधेः स तवाट्टहासः ॥ १ ॥

आगस्त्यदिक्प्रसृमरानिलपूरितेभ्यो
वंशप्ररोहसुषिरेभ्य उदेति या सा ।
गीतिस्तवैव सुमपर्णविचित्ररत्न-
सिंहासनोपरि लसद्वनदेवतायाः ॥ २ ॥

कुञ्जाच् चलत्प्रसवमांसलशाखिकाग्र-
डोलारसानुभवरक्तपिकावलीभ्यः ।
आशा प्रशाम्यदवकाशतरङ्ग्यमाणो
यः पञ्चमो हृदयचुम्बि शरः स्वरोऽयम् ॥ ३ ॥

शाखासु कन्दलदमन्दसुमेन नीप-
वृक्षेण साकमुदयिन्यसिते पयोदे ।
सान्द्रः प्रमोदतरलः प्रचलाकिवर्गो
यः कूजतीह स च षड्जगभीरनादः ॥ ४ ॥

वासन्तिकश्रिय उदङ्घ्रितलावघात-
फुल्लल्लतावलिवलल्ललितालिजृम्भी ।
रीङ्कार एष य उदीर्णमनोजमौर्वी-
नादः समुत्सुकितसर्वसचेतनं च ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वल्लीनियन्त्रिततरङ्गतुरङ्गयुक्ते
सूतन्मधौ मलयवायुरथे निविश्य ।
छत्रत्सुधाकरमपि व्यजनायमान-
काशप्रसूतमुपयान्तमनङ्गरागम् ॥ ६ ॥

अन्येऽपि ये द्विजगणाः प्रतिशाखिसंस्थाः
प्रयुद्ध्रजन्ति परितः स्तुतिपाठकामाः ।
आपादिताखिलचिदात्मकलोकचित्त-
क्षोभैश्च यैः स्तवनगीतिपदैरमीभिः ॥ ७ ॥

सर्वा अमूः सरसनादभरोर्मिमाला
आभावुकीकृतशिलात्मकजीवलोकाः ।
अम्ब! त्वदङ्कतलशालिसहस्रतन्त्री-
व्यास्फालमूर्च्छितनिरन्तररागमालाः ॥ ८ ॥

(१९७१)

पुलकमेति कश्चित् कविः

त्वदीयकरुणावशाच् श्वसिति याति सञ्चेष्टते
नपुंसकनरः कियत् स्वभुजमेदसा माद्यति ।
शवं वपुरिदञ्च सङ्कुचितचर्मदुर्भस्त्रिकां
प्रपूर्य मरुता त्वया तत इतः पदा क्रीड्यते ॥ १ ॥

विचिन्त्य पुरुषायितं लुठनमत्र तत्र क्षणं
जडा मुदमुपैति वा श्रमहताऽपि वा नश्यति ।
इयं तव तपस्विनी परमपुंस आस्याम्बुजे
दयाऽपहसितस्मितं नरवधूर्न चालोकते ॥ २ ॥

अधः पदपथस्य मृद्, जलमिदञ्च यत्पाल्वलं
महानसकरीषगो ज्वलन एष रथ्याचरः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृथाट्यपवनस्तथा तत इतश्च यत् खं त्वया
कृतं भुवनवैभवं कथममूभ्य एतादृशम्॥ ३ ॥

तृणस्य हरितिम्नि तत् तृणनताग्रचूडीभव-
त्सहेन्दुमिहिकामणेरपि च विस्फुरत् तद्युतौ ।
मणिं तमनुरञ्जयन् स्पृशति यश्च कल्ये करः
प्रकम्प्ररुचि तस्य च प्रसरभिन्ननानात्विषः ॥ ४ ॥

पदे पद इतीह ते परमफल्गुवस्तुन्यपि
स्फुरन्ति सुषमा विभो तव विभूतिलीलालवाः ।
इमा अखिलशिल्पिनामधिपतेश्च चिन्तातिगा
विलोक्य तव चिन्तयन् पुलकमेति कश्चित् कविः ॥ ५ ॥

(१९७६)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वीरेन्द्रकुमारभट्टाचार्यः

— तनुतीर्थम्
— आविर्भावः
— हृतसर्वस्वः
— युगकविः
(१९७२)
— मेघदूतम्
— वर्षाललन्तिकाः
(१९७६)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तनुतीर्थम्
(संस्तबकः)

रात्रिन्दिवं मे देहमन्दिरेऽस्मिन् संचिन्त्य विदेहरूपं
पूजार्चनार्थं वर्तते हि चेतो देव्या ननु वाञ्छितायाः ।
प्रज्वाल्य दीपं कल्पनाप्रतीकं स्निग्धञ्च हृदार्तिधूपं
हुत्वा च तस्यै प्रेमचन्दनाक्तं पुष्पं मम कामनायाः ॥ १ ॥

मुक्तानि सन्ति ज्ञानजालकानि स्वैरस्य तु मर्मराजो
रक्तानिलोऽतो मानसं प्रविष्टो जातश्च रसैः शरण्यः ।
शङ्का क्व पूते मन्मथस्य गेहे कस्मादपि तीर्थभाजो
दिष्ट्या च नित्यं प्राङ्गणं श्रयन्ते सौम्याचरणा रमण्यः ॥ २ ॥

स्फोटोन्मुखे वै प्रेक्षणे सरोजे काचिन्नु ददाति रामा
मञ्जूनि दत्ते चम्पकानि तन्वी कम्राङ्गुलिभिर्नु काऽपि ।
ओष्ठाधरस्थं केशरामृतं मे यच्छेन्न तु नास्ति वामा
बिल्वस्य युग्मं दीयते सकम्पं वृन्तैकगतं कयाऽपि ॥ ३ ॥

रम्यव्रता वा शर्मदा स्मितास्या यच्छति काम्योपहारम् ।
स्यान्निष्फला मे मङ्गलारतिश्चेन नौमि न कृत्स्नोपचारम् ॥ ४ ॥

आविर्भावः
(संस्तबकः)

पादार्पणं ते मामके हि मार्गे यावन्न मृगप्रेक्षिणि
स्तोकं न जातं धूलिकीर्णभूमौ नेत्रोल्लसनं शाद्वलम् ।
वन्ध्या वनानी मर्म मे दुनोति स्तब्धा बत कल्लोलिनी
नाकर्णितं वा यौवनार्तकुञ्जेवासन्तरुतं विह्वलम् ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कर्मेषुविद्धा जीवनस्य युद्धे सर्वे दिवसा दुःखदा
दत्ते प्रदोषे मारुतो भयं मे चित्तस्य चिरं कम्पनम्।
तन्द्राविहीनां यामिनीं नयेऽहं निःसंगगृहे सर्वदा
व्यर्थं बभूव प्रातरार्यसूक्तं क्रन्दस्यरुणालिम्पनम्॥ २ ॥

त्वय्यागतायां मङ्गलक्षणे मे यात्रासरणिं दुर्दृशं
स्निग्धः समीरो वाति मद्दिगन्ते शष्पाणि हसन्त्यध्वसु।
वृक्षैः सनाथा भान्ति पुष्पवल्ल्यो नृत्यन्ति तटिन्यो भृशं
कूजन्ति हृष्टाः पक्षिणः समन्ताच् चिन्ता मम चारुप्रसूः ॥ ३ ॥

क्लान्तिः क्व कार्ये स्वप्नमण्डिता मे सान्द्रान्धकारा त्रियामा।
रम्यासुपात्रं रञ्जयन् विनन्देत् प्रेम्णः सुरार्चिः प्रकामा ॥ ४ ॥

हृतसर्वस्वः
(संस्तबकः)

किं त्वं पश्यसि मे तनोस्तनुतटे शीताक्रममये
प्रौढायुर्विटपं निरस्तविहगं पुष्पैश्च रहितम्? ।
पत्रं वेपथुमत् प्रसह्य मरुता कीर्णं स्वनिलये
वित्तं श्यामरुचं विवर्णमधुना रिक्तञ्च विहितम्? ॥ १ ॥

वीतं दीप्रदिनं प्रयाति तपनो रक्ताभगगनं
दिग्बालाः सहसा रुदन्ति करुणं क्लिष्टाऽपि धरणी।
तूर्णं कृष्णनिशा तनोति निखिलं विश्रामलषणं
मृत्योः सा भगिनी वृणोति निचुले पुंसश्च रमणीः ॥ २ ॥

द्रष्टासि ज्वलनं मदीयतनुकं तारुण्यसमिधं
होत्रा पुष्पशरेण दीप्तमनिशं प्रेमारुणहविः।
चित्तं तिग्मपथं श्रयेत तरसा प्राणान्तकविधं
पुष्टो येन चिरं प्रदीनहृदयस्तेनाद्य हि कविः ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दृष्ट्वा सर्वमिदं किमार्तशरणं गच्छेदलसताम्? ।
निर्विण्णं दयितं प्रदर्शय सखि प्रेम्णः शमिलताम् ॥ ४ ॥

युगकविः
(संस्तबकः)

हित्वा पृथ्वीं गजदन्तरचितं तुङ्गमभ्राङ्गलीनं
हर्म्यं गुह्यं श्रयसे युगकवे कल्पनायाः किमर्थम्? ।
सङ्गीतं ते तरलीकृतरसं वास्तवस्पर्शहीनं
बाष्पीभूय प्रसभं रमयितुं प्राकृतान्नो समर्थम् ॥ १ ॥

क्वश्रुप्लावं श्रमवारिगलितं जीवितं दैन्यपिष्टं
सौख्यस्नातं क्व नु वा सुरभिणा जीवनं ते प्रकीर्णम्!
काव्यं बन्धो क्व च कर्णसुभगं स्वप्नसंलापसृष्टं
कुत्रार्तानां दलितान्तररुतं कण्ठभङ्गावदीर्णम् ॥ २ ॥

छित्त्वा तद्वै तरसा खरनखैर्मर्ममायार्चिजालं
मार्गं नृणां क्षतपादमथितं कर्दमाक्तं श्रयस्व ।
धृत्वा हस्ते क्षुरधारकलमं रक्तमस्या करालं
काव्योत्कर्षं नियतं प्रकटय क्षेमवृत्तं भजस्व ॥ ३ ॥

गच्छेद् दिष्ट्या गणनेतृपदवीं चारणश्चित्तदर्शी ।
काव्यं धन्यं भविता कविवरः सार्थकश्चाघमर्षी ॥ ४ ॥

(१९७२)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मेघदूतम्
(संस्तबकः)

कथं न्वेकदा विक्रमार्को नृपो मन्युमूढो हि जातो
विना कारणं स्वाधिकारश्लथं मन्यते कालिदासम्।
स हित्वा प्रियां राजधान्यां तदा दूरशैलं प्रयात-
श्चकारोर्जितं रामगिर्याश्रमं वर्षभोग्यं स्ववासम्॥ १ ॥

अथ प्रावृषि प्रेक्षणीयोऽम्बुदस्तेन दूतो ह्यवारि
प्रियामङ्गलं ज्ञातुकामः सुधीः स्वीयवार्ताञ्च दत्ते।
अवन्तिः कृता तेन कल्पालका प्रेयसी यक्षनारी
वियोगव्यथां गीतिमन्द्रां कविः खण्डकाव्ये विधत्ते॥ २ ॥

गतेगौरवं भावगम्भीरता शब्दवित्तं प्रभूतं
सुचित्रं तथा वृत्तविस्फूर्जितं सर्वमस्मिन् सशोकम्।
रसप्लावितं कल्पनाभास्वरं पुष्कलं मेघदूतं
श्रुतिह्लादनं प्रीणयेच्चामितं मार्मिकं विश्वलोकम्॥ ३ ॥

अहो लक्ष्यते वैक्लवस्यातुलो मञ्जुकाव्ये नियोगः।
कवेः कौशलं याति काष्ठां परां सार्थको विप्रयोगः॥ ४ ॥
(१९७२)

वर्षाललन्तिकाः
(संस्तबकः)

नगर्यामस्यां नः किमिव कमनं प्रावृषः केलिचित्रं
प्रशस्तेष्वङ्गेषु प्रविशति पथां पौरसंस्था खनित्रम्।
कुटिरवसतौ भाति मारीकपालं
रचयति पयः स्रोतसा नौप्रणालम्
न मन्दायन्ते वा निपुणवणिजश्चालयन्तो वहित्रम्॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यदा पर्जन्याम्बु प्रबलरभसा प्लावयेद्राजधानीं
तदैव त्यज्यन्ते सकलशकटै राजमार्गा इदानीम्।
द्रुतविकलतां याति विद्युत्प्रतन्त्रं
स्तनितविरतिं दूरभाषाधियन्त्रम्;
विमानव्याघाताच्छपति नभगः शङ्कितो वज्रपाणिम्॥ २ ॥

विडम्ब्यन्ते प्रायो वियति जलदं वीक्ष्य वर्षाभयार्ता
दरिद्रा येषां वै चलविपणयो भूयसा छिद्रसार्थाः।
दिवसकृतयो वञ्चिता वर्तनार्थात्
पथिकदयिता विप्रयोगप्रकर्षात्;
मुनीन्द्राश्लेष्यन्ते किमु तरुतले भोगिभिर्हृद्यवार्ताः ॥ ३ ॥

जलक्रीडामग्नाश्चपलशिशवः पल्वले कर्दमाक्ते
गृहान्तर्वृद्धा ये रसिकहृदया पत्ररङ्गे रतास्ते।
प्रतिगृहमहो भर्जितेल्लीशमीनैः
कृशररमितं पर्पटैस्तैललीनैः;
किशोरी गायन्ती भवनवलभौ मेघमल्लारमास्ते ॥ ४ ॥

चिरं केषां तोषं जनयति भृशं प्रावृषस्तोयधारा
मयूरा मोदन्ते तरुमरुदरा व्यङ्गगा वारिचाराः।
नभसि पुलकाद् विद्युतो नृत्यशीला
रहसि तरुणाः कुर्वते चित्रलीलाः,
मुदं यान्ति स्तेनास्तनुपणधनाः धीवराः काव्यकाराः ॥ ५ ॥

(१९७६)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बटुकनाथशास्त्री खिस्ते

— वसन्तविभावरी
(१९६५)
— जयत्यसौ वसुन्धरा
(१९६५)
— भागीरथीपद्यपुष्पाञ्जलिः
(१९६५)
— आत्मनिवेदनम्
(१९६५)
— प्रभातलक्ष्मीः
(१९७०)
— कृष्णमेघः
(१९७२)
— शरदिन्दुमुखी
(१९७८)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वसन्तविभावरी

उन्निद्रचन्द्रवदना मदनाभितप्ता
शप्ता निलिम्पललनेव भुवं प्रपन्ना ।
दुर्दैवतो दयितसङ्गमभङ्गदूना
निःश्वासलुब्धमधुपा मधुयामिनीयम् ॥ १ ॥

स्फारानुतापरभसेन विकीर्य तारा
हारान् वियन्मरकताङ्गनवेदिकायाम् ।
ज्योत्स्नावदातवदना श्वसनानुयाता
या ताम्यदम्बुजमुखी सुमुखी विभाति ॥ २ ॥

अत्राप्यसौ मलयभूधरचन्दनाली
व्यालीकरालगरलोत्कटवैभवेन ।
स्पृष्टा वनावनिचरेण समीरणेन
ग्लानिं प्रयाति नलिनीव करीन्द्ररुग्णा ॥ ३ ॥

ईषद्विकस्वरमुखं कुमुदं स्पृशन्ती
नीलोत्पलं निजकपोलमुपानयन्ती ।
सम्फुल्लपाटलिदलानि परामृशन्ती
धत्ते धृतिं न मधुमासमनस्विनीयम् ॥ ४ ॥

उत्सङ्गसङ्गतमनोज्ञमिलिन्दवीणा
क्वाणैः क्षणान् गमयितुं कतिचित् प्रवृत्ता ।
दूना पिकालिरुतरीति-वियोगरीति
व्याहारतोऽपि रमते न वनस्थलीषु ॥ ५ ॥

एनां वियोगदहनासहनां समुद्य-
त्सौन्दर्यसारसमवायनिषेव्यमाणाम् ।
आलोक्य कम्पति गलत्कुसुमाश्रुधारा
मारादिमा वनलताः सहसोत्सृजन्ति ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कह्लारचारुमकरन्दकरम्बिताङ्गी
मालिङ्गितुं नवसखीमिव सम्मुखीना ।
वापीं न याति बहुकण्टकलब्धविघ्ना
निघ्नातिदुर्वहरतीश शरज्वरस्य ॥ ७ ॥

पुष्पासवं परिनिपीय विलोलवल्ली
दोलासु खेलनकलाकुशला विलोक्य ।
रोलम्बवृन्दललनाः कलनादशीलाः
कीलाहतेव हृदि मोहमयं बिभर्त्ति ॥ ८ ॥

को वा प्रियतमस्तव मनस्विनि कुत्र देशे
किंवाऽप्रियं विहितमत्र च कोऽभ्युपायः ।
किञ्चित् प्रपञ्चय वचः परिषिञ्च सद्यः
पीयूषसागरतरङ्गपरम्पराभिः ॥ ९ ॥

नो किञ्चिदाह भजते न च मौनमुद्रां
वेणुस्वनेन विरहार्तिमुदीरयन्ती ।
नूनं व्यथातिशयलम्बितवक्त्रचन्द्रा
मन्दं प्रयाति मधुमासविलासिनीयम् ॥ १० ॥

(१९६५)

जयत्यसौ वसुन्धरा

तुषारशैलशेखरप्रभालसद्दिगन्तरा
स्रवत्तरङ्गिणीप्रसारहारभासुरा ।
ललाटकुङ्कुमायितोदयानुरक्तभास्करा
पवित्रसामसस्वरा जयत्यसौ वसुन्धरा ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यदीयभूरिसाहसप्रबन्धबन्धुरो गिरां
प्रवाह एष सत्त्वरं दिगन्तराणि गाहते।
स्वदेशरक्षणक्षणप्रदत्तपूतजीविताऩ्
स्मरामि तान् नरोत्तमानुपात्तलोकवन्दनान्॥ २॥

यदीयमञ्जुमृत्तिकाकणेषु जृम्भते चिरात्
प्रतापसिंहपौरुषं शिवाजिराजकौशलम्।
जगत्त्रयी विजित्वरी समस्तशत्रुघस्मरी
यदीयगौरवच्छटा जयत्यसौ वसुन्धरा॥ ३॥

विलोलवल्लरीमिलन्मिलिन्दवृन्दगीतयो
ध्वनन्ति कालिदासचारुसूक्तयो यदन्तरे।
रवीन्द्रवेणुनिक्वणा यदङ्घ्रिनूपुरस्वना
लसद्रसार्द्रमानसा जयत्यसौ वसुन्धरा॥ ४॥

विनिस्सरत्ययं ध्वनिर्हिमालयस्य कन्दराज्
जवाहरस्य मत्तवैरिकुञ्जरच्छिदो हरेः।
न हीयतां प्रवीरताऽपचीयतां न धीरता
न भारतीयता कदापि कापथेषु नीयताम्॥ ५॥

असीमभीमविक्रमक्रमा लसन्ति वाहिनी-
धुरन्धराः परस्सरा भुशुण्डिकोल्लसत्कराः।
यदीयतुङ्गहुङ्कृतिप्रहारशीर्णविग्रहाः
पतन्ति शत्रुपर्वता जयत्यसौ वसुन्धरा॥ ६॥

घनान्तरालचारिणी तडिल्लता यथाऽम्बरे
तथाऽस्ति शक्तिरत्र काऽपि भारते नरे नरे।
भयान्धकारहारिणी विपक्षपक्षदारिणी
जनप्रमोदकारिणी जयत्यसौ वसुन्धरा॥ ७॥

अशेषदेशनायकप्रशस्तिपुष्पशालिनी-
ममन्दबुद्धिकल्पनाप्रदीप्तरत्नमालिनीम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

समुच्छलद्दयारसप्रसन्नपङ्कजेक्षणां
विशालसागराम्बरां नमामि तां वसुन्धराम् ॥ ८ ॥

(१९६५)

भागीरथीपद्यपुष्पाञ्जलिः

इयं गिरिविदारिणी कलुषवृन्दसंहारिणी
धरातलविहारिणी गिरिशमौलिसञ्चारिणी ।
श्रमोदयनिवारिणी शशिशतप्रभाधारिणी
ममास्तु सुखकारिणी सुरधुनी जगत्तारिणी ॥ १ ॥

अघौघविनिवारिणि प्रसृमरे भवद्वारिणि
प्रवेशविधये गृहेष्वपि निजासनं मुञ्चताम् ।
नृणां परिजनान् निजान् नियमिनां निशम्योद्यमं
जडीकृतमना मनागमरनायकस्ताम्यति ॥ २ ॥

महेश्वरजटाटवीविहरणोल्लसन्मानसे
त्वदम्भसि तनुं निजां विजहतो विचित्राः कथाः ।
स एव सुरसुन्दरीरपि विहाय पौरन्दरी-
र्हरेरपि दुरासदां निविशते दशां शाङ्करीम् ॥ ३ ॥

निराकृतिगुणोज्झितं किमपि पिण्डितं ब्रह्म यद्
बुधैर्निगदितं, जनान् सुखयितुं न यत् कल्पते ।
यतो जनवदान्यया सकलमान्यया ब्रह्मणो
द्रवप्रकृतिभूतया धृतमिदं कृपार्द्रं वपुः ॥ ४ ॥

सिताऽपि हसितास्पदं, भवति नीरसं क्षीरम-
प्यहो व्रजति माक्षिकं रसनसाक्षिकं तिक्तताम् ।
किमन्यदधिकं स्तुवे त्रिदशवाहिनि त्वज्जलं
निपीय मनुते सुधामपि मुधा जनो मादृशः ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्रवीकृतशिवाचलप्रतिभटं भवत्या वपु-
र्विलोचनपथं यदि श्रयति पुण्यभाजां क्वचित्।
व्यपैति तिमिरं दृशां विविधजन्मजातार्जितं
स्फुरत्यविरतं पुरस्त्रिभुवनैकदीपो हरिः ॥ ६ ॥

सुरासुरनरोरगप्रभृतिसेविते देवि ते
कथं नु महिमा मया मितदृशा समुन्मील्यताम्।
विशालदुरिताटवीविकटपर्वतश्रेणयः
प्रयान्ति विलयं क्षणाज्जलतुषारलेशे तव ॥ ७ ॥

विपश्चिदतिमन्दयोर्द्विजवरेण्यचाण्डालयो-
र्धराधिपवराकयोस्त्रिदशराजमांसादयोः।
समुद्धरणकर्मणि व्यवसिता समा सर्वत-
स्तथापि करुणाविधौ त्वमसमाऽसि मातः क्षितौ ॥ ८ ॥

भगीरथतपःश्रमप्रभवपुण्यरेखात्मिका
मुनीन्द्रजनपावनाश्रमयशःपताकोज्ज्वला।
करालकलिभञ्जन प्रखरखड्गलेखा भुव-
स्तुषारगिरिनन्दिनी सुरतरङ्गिणी पातु वः ॥ ९ ॥

चलद्रुचिरहंसका परमहंससंसेविता
जडप्रकृतिधारिणी सकलजाड्यविध्वंसिनी।
पतन्त्यथ विहायसः शुभमतीन् नयन्ती दिवं
स्वतन्त्रगुणगौरवा जयति जह्नुराजात्मजा ॥ १० ॥

(१९६५)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आत्मनिवेदनम्

विधिविषमताऽरण्यस्फूर्जद्दवानलमालया
कवलितपथा किङ्कर्त्तव्यव्यपेतविचारणा।
सुकृतवशतस्त्वां ध्यायन्तीं शिवाममृतेश्वरीं
तदुदितबला जीवत्येषा मनोहरिणी मम॥ १॥

शिवगिरोः पादाम्भोजप्रसादवशादभू-
न्मम शिशुमतेर्भक्त्युन्मेषाङ्कुरस्त्वयि शाङ्करि।
मनसि तमसा रुद्धा लोके कथञ्चिदुदञ्चिता
तव चरणयोश्चिन्ता भिन्तां न किं मम सम्भ्रमम्॥ २॥

अयमविरतं धाता भाले दुरक्षरमालिका-
लिपिविरचने बद्धोत्साहो ममास्तु निरन्तरम्।
कुलकमलिनि त्वत्पादाब्जाभिषेकपृषत्कणै-
र्विगलितमदोद्रेको मूको भवेदघमर्षणैः॥ ३॥

मम समुदयारम्भस्तम्भं करोतु खलग्रहः
कुटिलहृदयः स्वामी नामीकृत्याशयं समुपेक्षताम्।
जननशतकानुस्यूता मां जहातु न सा तव
स्मृतिरनुदिनानन्दस्यन्दामृतैकतरङ्गिणी॥ ४॥

कलिबलपरीपाकोद्रेकात् सभासु भुजङ्गमां
भुवनपतयस्तारान् हारानिवादधते हृदा।
हृतनिवसना दीना दुःशासनप्रविकम्पिता
सुमतितरुणी म्लायत्येषा लतेव वनानलैः॥ ५॥

विगतजनुषां कर्मारम्भस्तनोति शुभाशुभं
फलमिति जगन्मातर्नातः परा वितथा गिरः।
भुवनजननस्थैर्यापाया दृशां यदि केलय-
स्तव नतसमुद्धारो भारोपमां कथमञ्चति॥ ६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुरहरपुरोपान्ते शान्ते क्वचित् सुमनोनदी-
तटपरिसरे सिद्धश्रेणीसमेधितवैभवे।
शिवगुरुकृपाधारामाराधयन् परमेश्वरी-
मपि भयशतं भिन्द्यां निन्द्यां कलेवरवासनाम्॥ ७॥

उदयतु तमस्तोमः सोमप्रभापरिभावकः
सकलजलदप्रौढिर्मूढीकरोतु दिशां स्थितिम्।
प्रतिहतपथान् विघ्नानेतान् भवत्करुणामय-
स्तरणि किरणालोकः स्तोकश्चिरस्य निरस्यति॥ ८॥

विविधविद्याभ्यासादासादयन् शुकवैदुषीं
सदसि पटुतास्थानं मानं विभूषयताज्जनः।
परमुदयते नैर्मल्यश्रीर्मनोमुकुरे ध्रुवं
तव परशिवे! पादाब्जोद्यद्रजःपरिमार्जनात्॥ ९॥

कवयतुतरां लोकः किञ्चित् कृतागमसञ्चरः
परिचितधरानर्थनितान् नवानिव भावयन्।
जनयितुमलं स्निग्धां दुग्धाम्बुधेरिव वीचिका
शिवसति भवद्दीक्षा द्राक्षामयीं कविताझरीम्॥ १०॥

(१९६५)

प्रभातलक्ष्मीः

प्रसरतु किरणावली समन्ता-
दभिनववासरनायकस्य बिम्बात्।
तिरयतु तिमिरं चिरन्तनं वः
प्रविकसतु प्रतिभा सरोजलेखा॥ १॥

विमलय नयने निधेहि पादं
गणय गुणान् कुरुषे मृषा विवादम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इयमति शुभदा प्रयाति वेला
कलय विभोर्ननु मङ्गलप्रसादम् ॥ २ ॥

तरुणतरणिरेष पूर्णकुम्भः
कनकमयो विधृतो दिगङ्गनाभिः ।
उदयगिरितटीकुटीनिषण्णो
भरतधरागणतन्त्रमङ्गलाय ॥ ३ ॥

कति कति न शिरांसि भक्तिभाजां
परिलुठितान्यजिरे स्वतन्त्रतायाः ।
त्रिभुवनकमनीयसाहसाना-
मिह परिनृत्यति कीर्त्तिकौतुकश्रीः ॥ ४ ॥

निपतति किमु नन्दनान्नितान्तं
स्नुतमधुबिन्दुचया प्रसूनपङ्क्तिः ।
नटति च निरवग्रहं दिगन्ते-
ष्वयमपि दुन्दुभिवृन्दधीरनादः ॥ ५ ॥

भरतवसुमतीसुतस्त्वमेकः
प्रभवसि विश्वविपत्तिभञ्जनाय ।
खगकुलकलभाषितापदेशा-
दिति वदतीव शुभा प्रभातलक्ष्मीः ॥ ६ ॥

(१९७०)

कृष्णमेघः

शम्पा यस्मिन्नकम्पा निवसति जगतां पालने सानुकम्पा
यस्य श्लाघां निलिम्पाः श्रुतिमधुरपदैः साधु सम्पादयन्ति ।
पुण्यैः कैश्चिद् विवेकी सरसकवितया जायते यस्य केकी
तृष्णां व्याधूय पुष्णात्वयममृतरसैर्वृष्णिभूः कृष्णमेघः ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृन्दारण्योद्भवासु प्रचलदलिकुलस्पर्धिनेत्रोत्पलासु
व्यावल्गद्भिभ्रमासु स्मितसितसुमनःसौरभामोदितासु ।
तारुण्यश्रीफलासु प्रणयरससुधास्वादनायोत्सुकासु
क्रीडन् कान्तासु तासु प्रमदयतु मनःकाननं कृष्णमेघः ॥ २ ॥

(१९७२)

शरदिन्दुमुखी

अमला कमलासनसन्निहिता
विहिताखिलभक्तकदम्बहिता ।
महिता विधिशौरिहरैर्जयतात्
कृपया सहिता शरदिन्दुमुखी ॥ १ ॥

विधृतोज्ज्वलचन्दनमाल्यगणा
धवलाम्बरतारकहारवती ।
त्रिदशीव धरावलये दयितं
विचिनोति नु किं शरदिन्दुमुखी? ॥ २ ॥

घनसन्तमसच्छिदुरैः किरणैः
कविकैरवजागरणप्रसिता ।
भ्रमरक्वणितैर्मुरलीरणितै-
रियमेति सखे शरदिन्दुमुखी ॥ ३ ॥

कलिकारदना विलसन्मदना
सुरभिश्वसना जलमुग्वसना ।
कलहंसकशिञ्जितमञ्जुपदा
समुदेति मुदे शरदिन्दुमुखी ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परितो हरितो हरितो दधती
कुसुमस्तबकाम्बरसंवलिताः ।
ललनाः कलनादपरास्तनुते
ललितेव सखी शरदिन्दुमुखी ॥ ५ ॥
(१९७८)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रतिनाथझा

— घनं प्रति
(१९६७)
— सुभाषितानि
(१९६८)
— मेघमाला
(१९६९)
— कौमुदी
(१९७२)
— मुक्तिवाहिनी
(१९७२)
— हिमागमः
(१९७३)
— चन्द्रः प्रवालप्रभः
(१९७८)

मालवीय शतकम्, गांधी शतकम्, अरविन्द शतकम्
कविभारती कुसुमांजलि भाग एक से छः तक में अनेक रचनाएं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

घनं प्रति

यत्त्वं विषं वमसि पुष्यसि निम्नगां यद्
यन्मित्रमण्डलमपि स्थगयस्युदारम् ।
यच्चञ्चलां श्रयसि यच्च वियोगिनोऽत्सि
तच्चातकावनपरस्य न दूषणं ते ॥ १ ॥

शक्रप्रियोऽपि महिषप्रमदप्रियोऽसि
कृष्णोऽपि निर्मलजलोज्ज्वलितान्तरङ्गः ।
पान्थान् विपोथयसि जीवनदोऽपि यस्मात्
पर्जन्य, कोऽन्य इह ते तुलनामुपैति ॥ २ ॥

अर्कस्य मर्षयसि हर्षनवाङ्कुरं चेन्
न प्रावृषेण्य निजपोषणकारिणोऽपि ।
तन्मौक्तिकाभसलिलस्य समर्पणेऽपि
देहे नवे धवलता लवतो न तेऽस्ति ॥ ३ ॥

सर्वंसहासहनशक्तिहृदुग्रतापं
सम्प्लावयन्नमृतवर्षणलीलयैव ।
यो जीवनार्पणपरोऽप्यवतीह सर्वान्
सोऽयं घनो न सहते किमु विप्रयोगम् ॥ ४ ॥

व्योमामितं सपदि मातुमिवाशुगस्य
वाहस्य पृष्ठमधिरूढतनुः पयोदः ।
उद्घुष्यतीव परिमाणमिवाम्बरस्य
यद्गर्जितं वदति मुग्धतयाऽद्य लोकः ॥ ५ ॥

श्यामोऽपि शीतलयति स्फुटमेव तीव्र-
तापामिलां विमलजीवनदानवृत्त्या ।
पुण्यस्य तस्य परिपाकवशादुपैति
किं वार्धके धवलता वपुषो घनस्य ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अङ्के निधाय चपलां दयितां स्फुरन्तीं
स्मेरानने किमपि गायति वारिवाहे ।
सद्यो मही पुलकितेव महीयतेऽद्य
प्रोद्यत्तृणाङ्कुरमिषेण महीयमाना ॥ ७ ॥

आशावधून्नतपयोधरमण्डलस्य
विद्युच्छटोच्छलितमौक्तिकदामदीप्तिः ।
कस्यान्तरेऽङ्कुरयति प्रसभं न कामः
कन्दं द्रुतं नयननन्दसमर्पणेन ॥ ८ ॥

स्वप्रेयसीमिव धरां हरिताम्बरेण
भ्राजत्तनुं जलद नीपसुमावतंसाम् ।
सन्दर्शयन् मुदितकेकिकुलैकलास्य-
मास्यं प्रमोदमधुरं कुरुषे प्रियायाः ॥ ९ ॥

सौदामिनीललितकेलिकुतूहलेषु
सक्तं विलोक्य धरणीरमणी भवन्तम् ।
कामातुरेव पुलकावलिभासमाना
द्राक् पिच्छिला भवति केनचिदुत्सवेन ॥ १० ॥

हर्षाङ्कुरोत्करकरोऽवनिमण्डलस्य
चण्डस्य चण्डमहसः प्रशमैकहेतुः ।
दिङ्नायिकानयनयोरसि कज्जलं त्वं
भूषाम्बरस्य शरणं घन चातकस्य ॥ ११ ॥

उल्लासभूमिरखिलस्य कृषीवलस्य
लोके महोत्सवकरश्च शिखावलस्य ।
प्रस्थानहेतुरयुजश्चरमोत्सुकस्य
भूतिप्रदोऽसि सरितो हरितः प्रियोऽसि ॥ १२ ॥

दोषा विभान्ति भवतो घन साहचर्याद्
योषाः प्रियाभिमतमुत्कतया चरन्ति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

घोषा मयूरकुलमुन्मदयन्ति कामं
प्लोषाः प्रयान्ति विपिनस्य शमं समन्तात्॥ १३ ॥
(१९६७)

सुभाषितानि

भ्रातर्नाविक! दुस्तरामतितरां कल्लोलिनीं लङ्घितुं
श्लाघ्यानेव जनान् सतामभिमतान्नावि त्वमारोहयेः।
चेदेकोऽपि दुरन्तपातककुलानुष्ठाननिष्ठो जनो
दैवादत्र समैति हन्त सुजनैः सार्धं तरिं मज्जयेत्॥ १ ॥

माकन्द! त्वमुदारतामिव महाशाखां विशालां श्रयन् दु ।
दिग्भ्योऽभ्येत्य खगः परस्परमतिप्रेमाङ्कुरं वर्धयन्।
कीर्त्तिं ते सकलासु दिक्षु वितरंस्त्वत्कोटरस्थायिना
सर्पेण प्रतिहन्यते यदि ततः कीदृग् यशस्ते भवेत्॥ २ ॥

उत्फुल्लैः कमलैर्मरन्दमुदिरैर्गुञ्जद्भिरेवालिभि-
र्हंसैः सारसमण्डलैर्मुखरितैः सच्चक्रवाकैर्द्विजैः।
लक्ष्मीं कामपि बिभ्रदुज्ज्वलजलै रम्यं समृद्धं सरो
दुर्भाग्यायतनं करोति नितरामेकोऽपि भेको वसन्॥ ३ ॥

नीचाः सन्ति सहस्रशोऽधिभुवनं किन्तु क्षमाक्षामता-
हेतुः श्येन! भवादृशो न विदितो बन्धून् मुधा मारयन्।
नो रक्तासवपानपीनपरमोत्कण्ठा न मांसाशन-
प्रीतिस्फीतरुचिश्च तेऽस्ति तदपि क्षीणान् निहंसि द्विजान्॥ ४ ॥

स्तम्भे निःसारतैवानिलमिलनवशाद्, दीर्यते ते सुपत्रं
वन्ध्यत्वं जीवनस्य प्रकटयति फलोत्पत्तिराद्यैव सद्यः।
नो छाया नापि शाखा न खलु सुमनसः सौरभं लोभनीयं
रम्भे, किं गर्वगन्धं भजसि निजमनस्याशु नश्यद्विभूत्या॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कीर्त्तिः का तव का च सिद्धिरतुला विश्वस्य सम्प्रीणने
काये का सुषमा सुदुर्लभतरा का लोककाम्या स्थितिः ।
लक्ष्मीः का, वनदेवतास्तुतपदा का माधवाराधिता
शोभा तेऽस्ति पिकेति पृच्छति मुहुः काकाध्वनिर्वायसः ॥ ६ ॥

सच्छायद्रुमकृन्तनाय परशुर्दग्धोऽपि वैश्वानरे
भूयश्चायसपिण्डताडनसहस्तीक्ष्णो भवन् भ्राजताम् ।
तावन्नैव भयं ततो न लभते यावत्स तक्ष्णः करं
दुष्टः किन्तु परोपकारकरणे ह्येकोऽप्यनीकायते ॥ ७ ॥

ये स्वार्थप्रतिपत्तये प्रतिपलं नव्यानभव्यानपि
प्रह्वीभूय महाप्रभूननुनयन्त्युच्चावचैः कर्मभिः ।
निन्द्यास्तेऽपि परन्तु हन्त सुजनोत्कर्षासहिष्णुः खलो
व्यर्थं सर्वहितक्षयाय विचरन् गर्हास्पदं जीवति ॥ ८ ॥

प्रीतिर्मास्तु परानुरक्तहृदये दाक्ष्यानभिज्ञप्रभो-
र्मा सेवावसरोऽस्तु दैन्यविनतिर्नैवास्त्वदातुः पुरः ।
श्रद्धा दम्भिनि माऽस्तु माऽस्त्वरसिके काव्यामृतप्रापणं
वैमुख्यं परमेश्वरान्न भवतु ब्रह्मन्निति प्रार्थये ॥ ९ ॥

वन्यं स्वादुतृणं न लभ्यमधुना ग्रासो न घासस्य ते
प्राप्यं नैव कडङ्गरं न सुरभे पेयं जलं शीतलम् ।
न पूजा, न समादरो, न परमा सेवा, न रक्षाव्रतं
चित्ते नैव विचिन्त्यतां शुनि यतो रक्तः प्रभुः साम्प्रतम् ॥ १० ॥

(१९६८)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मेघमाला

परं दुस्सहोदग्रकंसादिचण्ड
प्रतापार्कतेजोपहा मेघमाला ।
चिरं देवकीदीव्यदङ्काम्बरे
विद्युदुल्लासिता शातयेन्मेऽघमालाम् ॥ १ ॥

यामम्बु पञ्चषकणानपि याचमान-
स्त्वं निर्निमेषनयनः प्रसमीक्षसे खे ।
सा ते समर्पयति जीवनबिन्दुमद्धा
श्रद्धान्विताय किमु चातक मेघमाला ॥ २ ॥

चण्डांशुतीव्रकरतापनिपीतहर्षा-
मप्राप्तवारिवरसीकरबद्धतृष्णाम् ।
शुष्यत्सुजीवनरसामधुना रसां द्राक्
सम्यग्रसां वितनुतामिह मेघमाला ॥ ३ ॥

रविहृतवसनाया पांशुलाया अवन्या
नवहरितदुकूलैरङ्गमाच्छादयन्ती ।
स्फुटकुटजकदम्बामोदमापादयन्ती
प्रियललितसखीवाभ्युद्गता मेघमाला ॥ ४ ॥

(१९६९)

कौमुदी

जलधरस्य जलैरभिषेचितां
दिनकरस्य करैरतिभूषणाम् । भूषिताम्
विटपिनां सुमनोभिरलङ्कृतां
वसुमतीमभिनन्दति कौमुदी ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बहुविधैः कुसुमैर्नवपल्लवै-
र्द्विजगणैर्मधुरस्वरमेदुरैः ।
श्रियमुपैति न तां तु वसुन्धरा
शरदि यां तनुते शशिकौमुदी ॥ २ ॥

सुधामुचं वाचमचिन्त्यवैभवा
मुदाऽर्पयन्तीव चकोरके द्विजे ।
तदीयसत्कीर्त्तिविभानुलेपनाद्
भुवं विभूत्या तनुतेऽथ कौमुदी ॥ ३ ॥

(१९७२)

मुक्तिवाहिनी

महाद्रिकल्पमुल्लसत्पिशाचमण्डलोपमं
प्रचण्डमुग्रबाहुदण्डमन्तकप्रियं परम् ।
तरङ्गरिङ्गणक्रमैरुदग्रसञ्चरत्स्वरै-
रमज्जयज्जवेन विभ्रमेण मुक्तिवाहिनी ॥ १ ॥

दुरन्तशस्त्रसङ्कुलोल्लसत्करैश्चलत्पदै-
रपारपाकसैनिकैर्निरस्त्रवङ्गनाशकैः ।
नितान्तमर्दितां महीमचीचयत् स्वजीवनैः
पराभियानरोधनैर्मुजीबमुक्तिवाहिनी ॥ २ ॥

स्वतन्त्रतानुरागरक्तमानसोच्छलद्रसैः
सुवर्णवङ्गभूमिमानरक्षणे दृढव्रतैः ।
वसुव्ययैरसुव्ययैरपि प्रमत्तयौवनै-
र्नवाभिमन्युसैनिकै रराज मुक्तिवाहिनी ॥ ३ ॥

अलज्जराक्षसाधमैर्विलोभिताऽपि पूर्णतो
विभीषिताऽपि मर्दिताऽपि न जहौ निजव्रतम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जयेन्दिराभिनन्दिता प्रशस्तलोकवन्दिता
गृहीतसत्पथा बभौ सतीव मुक्तिवाहिनी ॥ ४ ॥

(१९७२)

हिमागमः

असुन्दरस्याहनि या हिमांशोः
कलां विलोक्योल्लसतीव पद्मिनी ।
ततोऽतिकोपात् कुलमेव तस्या
निहन्ति तन्मित्रतया हिमागमः ॥ १ ॥

द्विजमथामृतमप्यखिलप्रियं
सरसिजञ्च विरूपयितुं भृशम् ।
जगति मित्रमतिप्रणयास्पदं
शिखिनमातनुते च हिमागमः ॥ २ ॥

नहि धनं न सुशासनशासनं
समधिकर्तुमनाचरितं शुभम् ।
अपनयादपयाति रसातलं
चिरसमर्जितसन्महिमागमः ॥ ३ ॥

प्रियं द्रुतं गन्तुमिवाम्बराञ्चला-
ज्झटित्यकस्मादुपसंहृतश्रियम् ।
मुहुर्मुहुः प्रार्थयते सरोजिनी
निशागमे नाथ बहिर्हिमागमः ॥ ४ ॥

(१९७३)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चन्द्रः प्रवालप्रभः

मन्दारद्रुममञ्जरीविरचितस्रग्दामभिर्मण्डिते
सामोदे मणिदीपपीततिमिरे श्रीधाम्नि केलीगृहे।
शम्भोर्मन्मथमेदुराध्वरसमारम्भेऽभवत् पार्वती
पादालक्तकलिप्तगात्रविभवश्चन्द्रः प्रवालप्रभः ॥ १ ॥

सिन्दूरैरनुलेपिते तिलकिते काश्मीरजैः कुङ्कुमै-
र्माल्यैर्मञ्जुजपाप्रसूनरचितै रक्तोत्पलैरर्चिते।
शोणक्षौमविनिर्मिताम्बरवृते भक्तानुरक्ते परे
देवे श्रीमति ऋद्धिसिद्धिरमणे चन्द्रः प्रवालप्रभः ॥ २ ॥

दग्ध्वा व्योमवसुन्धराङ्गसुषमां हृत्वेन्दुताराश्रियं
पीत्वा हन्त कुमुद्वतीप्रमुदितामस्तंगते भास्करे।
नृत्यन्त्याः क्षितिजेऽथ गीतरसिकानालापयन्त्या द्विजान्
सन्ध्याया नवसङ्गमात् समुदितश्चन्द्रः प्रवालप्रभः ॥ ३ ॥

अन्यालिङ्गनलक्ष्म वक्षसि किमप्यालक्ष्य दन्तच्छदे
लग्नं कज्जलमाकलय्य विरसं वीक्ष्य प्रियस्यान्तरम्।
जातेऽलक्तकलोहिते सुनयने गण्डे च रक्तोत्पले
मानिन्याः समभून्मृणालधवलश्चन्द्रः प्रवालप्रभः ॥ ४ ॥

स्निग्धं बन्धुजनं प्रसादमधुरः प्रह्लादनो मादनः
पूर्वं यः स्मितचन्द्रिकामृतझरैरानन्दयन् राजते।
सोऽयं सागसि वल्लभे मृगदृशः शोणद्युतेरुद्गमात्
सञ्जातो नवनीतनिर्मलरुचिश्चन्द्रः प्रवालप्रभः ॥ ५ ॥

शुक्ले शुक्लयशोऽवतंसितजगज्जाले प्रतापानलो-
द्भासा भास्वरकेसरद्युतिमयो जातः प्रपञ्चोऽधुना।
सर्वेषामनुरञ्जितं सुमनसामन्तर्निसर्गोज्ज्वलं
शम्भोर्भालविभूषणञ्च समभूच्चन्द्रः प्रवालप्रभः ॥ ६ ॥

(१९७८)

Dr. Urmila Sharma Collection, Varanași

CC0. In Public Domain, Digitizagtion by eGangotri

मधुकरगोविन्दमाईणकरः

— स्मिततरङ्गम्
(१९७५)

— गायिकाशिल्पकारम्
(१९८०)

1. निष्कासनम्
2. निवेदनम्
3. निश्चयः
4. विरहाकुलत्वम्
5. नैराश्यम्
6. समापनम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्मृतितरङ्गम्

कौन्दं पुष्पं धवलहसनं चारुगन्धं विशीर्णं
चन्द्रो म्लानः प्रतनुसलिला सिन्धुरेषा सुदीना ।
वैवर्ण्यं तन्नभसि भजते चापमाखण्डलस्य
मन्ये सर्वं जगदिदमहो लुप्तसौभाग्यकल्पम् ॥ १ ॥

एते मेघा नयनसुखदाः स्वान्तरङ्गे तरङ्गाः
केचिच्छुभ्रा विरलविरलाः श्वेतकार्पासपुञ्जाः ।
केचिच्छ्यामा भयदमकरा हस्तिनो युद्धदर्पा
दृष्टाः खिन्ना विमलगगने कुत्र गच्छन्ति शीर्णाः ॥ २ ॥

सन्ध्या याता निखिलभुवनं लेपयन्ती तमोभिः
स्वान्तं जातं विरहविधुरं शून्यमेव स्वगेहम् ।
रक्तं कान्तं कठिनहृदये मामुपेक्ष्यैव शीघ्रं
चण्डि क्रूरे दिवमुपगता निष्ठुराऽसि प्रिये त्वम् ॥ ३ ॥

शिष्या भार्या हृदयदयिता पुष्पकेलिप्रिया* सा
सङ्गीते सा कृतपरिचया वाङ्मये संस्कृताङ्ग्ले ।
गौराङ्गी सा चतुरवचना गेहिनी कर्मदक्षा
श्यामा वामा दिवमुपगता कर्करोगेण दीर्घा ॥ ४ ॥

भैषज्यं तत् पटुसुकृतिनां ख्यातधन्वन्तरीणां
निष्णातैः सा कठिनविहिता दीर्घशस्त्रक्रिया ते ।
शुश्रूषा मे तव बहुविधा बान्धवैः सा च सेवा
दैवे रुष्टे भवति विफलः प्राणिनां हन्त यत्नः ॥ ५ ॥

अत्र स्यान्मे शयनभवनं तत्र मे पाकशाला
अत्रस्था मे भवनवलभी तत्र मे गीतकक्षः ।

---

* आङ्ग्लभाषायां 'बॅडमिंटन' इति विश्रुता केलिः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इत्थं नित्यं बहुमततमैर्निश्चितं कल्पनैस्ते
नीतं कान्ते ललितभवनं पूर्णतां शिल्पिभिर्मे ॥ ६ ॥

उद्यानं ते भवनमभितः पश्य जातं प्रफुल्लं
फुल्ला जातिर्विशदविमला रात्रिराज्ञी सुगन्धिः ।
रक्ताशोकैर्भवनमधुना वेष्टितं तत् सुरम्यं
अन्तःशून्यान् वहति करुणान् शोकपूर्णान् स्वकक्षान् ॥ ७ ॥

सन्ध्या जाता संपदि भविता दीर्घयामा त्रियामा
सर्वे कक्षास्तिमिरभरिताः स्तब्धगीतञ्च गेहम् ।
कान्तास्मृत्या विकलहृदयं कम्पते वेपते मे
विद्युद्दीप्तं यदपि भवनं भीषणाभोगरूक्षम् ॥ ८ ॥

एतत् स्तब्धं वलययुगलं काञ्चनस्य त्वदीय-
मासीद् बद्धं मसृणकरयोराविवाहान्मयैव ।
अस्यैवासीन्मधुररणनं मान्मथे कूजितं ते
सत्यं तस्य स्मरणमधुना चित्तवैक्लव्यकारि ॥ ९ ॥

हारोऽयं ते खलु शुभविधौ मौक्तिकानां प्रसन्नः
कण्ठे बद्धस्तव नु विमले वृद्धया मे जनन्या ।
वारं वारं त्रुटितगलितो वीक्षितः कामयुद्धे
कण्ठाश्लेषाच्चिरविगलितश्चित्तदाहं तनोति ॥ १० ॥

अस्त्येतत्ते पदयुगशुभं मञ्जुमञ्जीरयुग्मं
पादन्यासक्वणनमधुरं दारुणं शस्त्रमेतत् ।
शिञ्जाज्वालैः शयनभवने वर्धयत् कामदाहं
मन्ये कान्ताचरणविरहाद् बद्धमौनं प्रमुग्धम् ॥ ११ ॥

एषा रम्या मरकतचिता मुद्रिका वाग्विवाहे
प्रेम्णा न्यस्ता मदनलतिके कोमले ते कराग्रे ।
स्थानाद्भ्रष्टा मलिनमलिना राजते नापि दीना
मन्ये तस्मादहमिव सखि क्षीणपुण्या सखी ते ॥ १२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अस्निग्धस्ते कुटिलबहुलः कृत्रिमः केशपाश
एषा दृष्टा तव सुनयने कज्जलार्था शलाका।
ते बिम्बोष्ठ्या अधरसुषमावर्धिनी रङ्ग्यष्टि-
र्यति योधे भवति विकलो दारुणः शस्त्रकोशः ॥ १३ ॥

एतत् कान्ते तव बहुमतं नीलवर्णं दुकूलम्
उर्वश्यास्ते रुचिरवसने निर्जितो रूपगर्वः।
तत्कौमुद्यां भवनवलभौ नेत्रयोर्मे पिधानं
रोदित्यैलः करुणकरुणं कान्तया विप्रयुक्तः ॥ १४ ॥

यावत्कुर्वे भवनवलभौ पेयपानं प्रभाते
आयातस्ते बहुपरिचितो वर्त्तिकानां समूहः।
वाञ्छन्नास्ते तव करगतान् तण्डुलान् विप्रकीर्णान्
ध्वस्ताशानां पटुकलकलो व्याकुलं मां करोति ॥ १५ ॥

नीडार्थं हि प्रसवसमये वर्त्तिकायुग्ममेतद्
वाञ्छद् वस्त्रं भ्रमति भवने जीर्णपिच्छानि चिन्वत्।
दत्तस्तस्मै सकलसुखदे शुभ्रकार्पासपुञ्जः
कृत्वा चित्ते मृदुलसुखदा स्याद्धि शय्या तदीया ॥ १६ ॥

मात्राऽऽनीतौ मृदुकलकलौ चाटकेरौ नवीनौ
पश्याम्येतौ तव बहुमतौ व्याकुलः साश्रुनेत्रः।
मात्रा दत्तान् निजशिशुमुखे तण्डुलांस्तान्निरीक्ष्य
जातो हर्षस्तव च कुतुकं कीदृशी वत्सला त्वम् ॥ १७ ॥

दृष्ट्वा भूमौ पतनविकलं वर्त्तिकायाः शिशुं तं
वात्सल्यात्तं परमकृपयाऽपोषयः पाककक्षे।
मार्जाराद्धि प्रचुरमवनं सारमेयात्कृतञ्च
याते तस्मिन् वियति चटुले त्वाश्रुनेत्रां स्मरामि ॥ १८ ॥

खाद्यं चिन्वन् भवनवलभौ मित्रकल्पः कपोत-
श्चञ्चुं कान्तावदनपुटके न्यस्य कान्तं विधुन्वन्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चक्राकारं भ्रमति च पुनः प्रेयसीं रोद्धुमिच्छन्
दृष्टो दृप्तः सह दयितया मानसं मे दुनोति ॥ १९ ॥
(१९७५)

गायिकाशिल्पकारम्

1. निष्कासनम्

स्नात्वा स्वं वसनं करे धृतवती कक्षं प्रविष्टा यदा
स्वाङ्गे तत्परिधानमग्रमनसा नालोकितोऽहं स्थितः ।
दृष्ट्वा मां हसितं, त्वयैव कथितं, "मा गच्छ कक्षाद् बहिः
सङ्कोचः खलु माऽस्तु ते स्वहृदये विश्वासभूमिर्भवान्" ॥ १ ॥

श्रुत्वेदं वचनं मयाऽपि पठने व्यापारितं मानसं
सत्यं ते कथयामि यत्पुनरिमे नेत्रे च मे चञ्चले ।
दृष्ट्वा ते रमणीयदेहघटनं तत्रैव लुब्धे खले
ध्यात्वा तद्विधिकौशलं मम तदा मुग्धं प्रजातं मनः ॥ २ ॥

तन्नूनं शशिखण्डशोभि निटिलं नेत्रे च ते मीनके
रम्यं तत् खलु हेमकुम्भयुगलं दिव्यो रथो मादनः ।
निर्माणे परिमाणबन्धविषये सञ्जातकौतूहलाद्
देहे ते विमले सुरम्यघटिते व्यापारितौ मे करौ ॥ ३ ॥

लज्जाक्रोधवशात् पपात वचनं वज्रोपमं ते मयि,
"मा त्वं, मा च कदापि दर्शय मुखं, निर्गच्छ गेहाद् बहिः ।"

2. निवेदनम्

नान्येषां पुरतः कदापि विनतं दृप्तं ममैतच् शिरः
उक्त्वैतद् वचनं हृदिस्थदहनः प्रज्ज्वालितो ते भृशम् ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्थाने तत्कथितं त्वयैव सततं विश्वासयोग्यः प्रियो
जातः किं वद वल्लभे प्रियतमो निष्कासितः स्वाद् गृहात्।
स्यादेषा तव कल्पना च विषमा 'कामाग्निदग्धः खलः'
तस्मादेव च मानभङ्गवचनाच्चित्तेऽस्ति तीव्रा व्यथा ॥ ५ ॥

शल्यं त्वद्वचनं स्मरामि सततं गच्छामि शृण्वन्निव
कान्तिं तां शुभहेमवर्णरुचिरां तां वक्रतां चारुताम्।
दृष्ट्वा तद्विधिकौशलं प्रियतमे चित्तं हि मे विस्मितं
कान्ते नैव च कामदिग्धमनसा स्पृष्टा मया ते तनुः ॥ ६ ॥

तद् दृष्ट्वा विधिकौशलं यदि भवेत् कामोद्भवो मानसे
मूढोऽसौ खलु कामपङ्कमलिनो हा धिक् हि तज्जीवितम्।
वर्णैस्तल् लिखितं यथैव रुचिरं मोनालिसायाः स्मितं
रम्यां ते घटयामि मूर्त्तिमुपले 'स्नानोत्तरा कामिनी' ॥ ७ ॥

3. निश्चयः

मद्गेहं नतभित्ति तस्य पुरतो देवालयः सुन्दरो
नित्यं यत्र स ऋद्धिसिद्धिसहितो विद्याधिपः पूज्यते।
मूर्त्तिः सा वरदा च सुन्दरतमा या शिल्पिभिर्निर्मिता
दृष्ट्वा तां सकलं विनश्यति तमश्चित्ते च यत् कश्मलम् ॥ ८ ॥

तत्पार्श्वे वहति प्रसन्नसलिला मन्दाकिनी पावनी
चन्द्राकारगता च रम्यहरितैः सा शाद्वलैः शोभिता।
सन्ध्यायां प्रणिपातदर्शनपरा सम्मेलिता भाविका-
स्तेषां मङ्गलगायनैश्च भजनैश्चित्तं नृणां पावनम् ॥ ९ ॥

मद्गेहं प्रति साम्प्रतं तु गमनं तत्रैव शिल्पे श्रमः
शिल्पं तद्रचयामि चारु विविधं विस्मृत्य सर्वं जगत्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवं सा खलु सिद्ध्यति प्रियतमा 'शिल्पाश्रमे' साधना
हस्ताभ्यां घटयामि तत्र सततं ध्यातं हि यच्चेतसा ॥ १० ॥

गत्वा तत्र करोमि दैवहतकः शिल्पेषु यत्नं दृढम्
एकान्ते खलु सिद्धिदाश्च कथिताः सर्वाः कलासाधनाः ।

4. विरहाकुलत्वम्

एषा मे पदचातुरी च विफला गान्धर्वविद्या तथा
जाता मे खलु साधनाऽपि विरसा चित्तं न मे रज्यते ॥ ११ ॥

सत्यं ते विरहे प्रसाधनविधिश्चित्ते न मे श्लिष्यति
आस्था ते यदि विद्यते च ललिते गान्धर्वनृत्यादिके ।
एहि त्वं, पुनरेहि, एहि सदनं, चेतः समुत्कण्ठते
पृच्छा त्वद्विषया कृता स्वसदने पृच्छा च मित्रेष्वपि ॥ १२ ॥

पृष्टास्ते सकलाश्च बान्धवजना वृत्तं न ते लभ्यते
सर्वे ते कथयन्ति मां हि कुलजा 'अज्ञातवासं गतः' ।
तत्रस्थः प्रियसाधनां स कुरुते शिल्पे प्रसिद्धा रती
रम्यं रम्यतरं करोति भुवनं क्रीडन् वसन्तो वने ॥ १३ ॥

रम्यं कूजति कोकिलो मधुतरौ क्षारं क्षते प्रक्षिपन्
ध्वस्तोऽयं प्रणयो मया सुमधुरः कोऽयं ग्रहो मे तदा ।
वर्षाणां दशकं प्रयातमधुना कुर्वे प्रतीक्षां तव
आगच्छ, प्रियकान्त सत्वरमिदं, शल्यं हि दूरीकुरु ॥ १४ ॥

5. नैराश्यम्

अन्तं याति च जीवनं पुनरियं यात्रा समाप्तिं गता
तीरं याति च मन्दमन्दगमना नौका हि मे दुर्बला ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यद्यत् सत्कृतमन्यथा च सकलं तस्यावसानं शुभम्
एषा मे च कला प्रिया सुफलिता या सर्वदा पूजिता ॥ १५ ॥

याऽऽसीन्मे हृदयेश्वरी च सततं या मे सदा स्फूर्तिदा
व्यर्थं तत्खलु सर्वमेव विकलं यन्मानवो वाञ्छति ।
जातो मे त्वनुताप एव हृदये यस्माद् गतं शोच्यते
जातं मे खलु मृत्युभीतिविकलं चित्तं किमर्थं पुनः ॥ १६ ॥

जाने तत्खलु दारुणञ्च वितथं भस्मावसानं वपु-
रेषा मे च कलाऽपि विस्मृतिपथं शीघ्रं पुनर्यास्यति ।
यद्रम्यं सकलं कलाकृतिमयं विश्वं श्रमान्निर्मितं
तत्सर्वं क्षणभङ्गुरञ्च सकलं व्यर्थोऽभिमानो नृणाम् ॥ १७ ॥

वैक्लव्येन च कश्मलेन तमसा चित्तं सदा पूर्यते
मोक्षार्थं निजदासदैन्यहरणं सर्वेश्वरं प्रार्थये ।

6. समापनम्

अन्धं दृष्ट्वा निजसहचरं रोदितुं सा प्रवृत्ता
हस्तस्पर्शैः करुणमृदुलैः सान्त्वयामास धीरः ॥ १८ ॥

हस्ताद् भ्रष्टं प्रियमपि पुनः शाश्वतं यातमेव
बाष्पोत्सेकैर्न च खलु पुनः शीर्णपुष्पं सुगन्धि ॥ १९ ॥

(१९८०)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उमाशङ्करशर्मत्रिपाठी

— अस्पृश्यान्तर्निवेदितम्
(१९६७)
— चक्रिचूडामणिः
(१९६८)
— कृषकः
(१९७१)
— मधुकर! ते दिवसा विगताः
(१९७३)
— सैन्यप्रयाणम्
(१९७४)
— वसन्तः
(१९७४)
— युद्धवर्णनम्
(१९७४)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अस्पृश्यान्तर्निवेदितम्

वीताकाङ्क्षस्तपति भुवनं भास्करे जृम्भिताग्नौ
कृच्छ्रायासोद्गिरदविरलस्वेददिग्धाङ्गयष्टिः।
क्षुत्क्षामोऽपि श्रयितुमखिलं जीवलोकं महात्मा
प्राणान् वर्णाश्रमहुतवहे दीनदीनं जुहोति ॥ १ ॥

द्वारि क्षेत्रे विषमविपथे सक्षमः कर्मसक्तो
द्रागुद्दिष्टो निकृतिपरमः सेवमानः सवर्णान्।
स्मारं स्मारं स्वनियतिफलं व्यस्तकल्याणवर्त्मा
यद्यस्पृश्यो मरणमधिकं काङ्क्षते कोऽत्र दोषः? ॥ २ ॥

कोऽसौ वर्णो वदत सुधियश्चित्रसिंहानुकारो
यद् दीनेषु ज्वलति रभसं सक्षमेष्वस्तमेति।
युक्तं गौरो यदि न मनुते श्रोत्रियं श्वाधिकं यद्
वर्णश्रेष्ठाः! अपरमफलं रोचते किं भवद्भ्यः? ॥ ३ ॥

जीवद्रोहः स्वजननिकृतिर्मोहदम्भानुतृप्त्यै
दैवायत्तं जननमवनौ पौरुषं गौरवं च।
कर्माराध्यो भवति मनुजो विश्रुतो वाऽश्रुतो वा
मिथ्यादृष्टिं त्यजत सुधियो वर्त्तमानो ब्रवीति ॥ ४ ॥

को निर्णेतुं प्रभवति भवे शुद्धरक्तप्ररोहं
कस्मिन् गोत्रे धवलकिरणा शीलगुप्तिर्विभाति।
क्व ध्वस्तास्ते श्वपचशबरास्ते शकास्ते पुलिन्दा
आर्यः पन्थाः प्रणयति शिवं भ्रातृभावं जगत्याम् ॥ ५ ॥

चाण्डाले वा शुनि गवि बुधे चात्मदृष्टिप्रसारं
वर्णाचारं रचयति मतिः सा श्रुतिस्तच्च शास्त्रम्।
योऽसौ विष्णुः श्रमिकरचनाकौशलोत्कीर्णभावो
देवागारे सकृदपि वयं वीक्षितुं तत्र शक्ताः ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यत् कूटस्थस्त्रिगुणरहितः सर्वदृक् सप्रसादो
दीनानन्दोऽप्यखिलशरणोऽस्पृश्यलोकाद् बिभेति ।
तद्वैतस्थाः स्वयमसहना मोघमाहात्म्यदिग्धा
नष्टात्मानः शिवमपि निजोपाधिभाजं विदन्ति ॥ ७ ॥

केषां कीर्त्तिर्हरिगृहमिदं मन्दिरं नेत्ररम्यं
वेदज्ञैः किं विरचितमिदं क्षत्रियैर्वाथ वैश्यैः? ।
अस्पृश्यानां दिशति धवलां सभ्यतावर्त्मपङ्क्तिं
प्रासादोऽसौ नभसि पवनाश्लेषकम्पत्पताकः ॥ ८ ॥

कोऽरातीनां मनसि सहसा स्वासिधाराप्रपातै-
र्ध्वंसाध्यायं लिखति सहठं राष्ट्रगुप्त्यै सुकर्मा ।
कण्ठात् कस्य क्षतजबहलस्यन्दपूर्णालवालः
स्निग्धच्छायो वितरति मुदं श्रेयसे राष्ट्रशाखी ॥ ९ ॥

कृत्ये येषामहनि तपनोऽनन्तदृष्टिः प्रमाणं
येषामिन्दोर्निशि विचरिते साक्षिणी चन्द्रिकैव ।
काये येषां मनसि वचने द्वैधवृत्तेरभावः
सिद्धात्मानो यदि सुमतयस्तेऽन्त्यजाः साधवः के ॥ १० ॥

ग्रामाद् दूरे यमदिशि वसन् प्रेतभूमेः सकाशं
पायं पायं मलिनसलिलं कीटशम्बूककीर्णम् ।
दीर्घश्मश्रुर्ल्लेपितवदनो जीर्णकौपीनवासा-
श्चाण्डालो वा नरपशुरयं हिन्दुभाले कलङ्कः ॥ ११ ॥

कन्थाबन्धे दधति हिमतां भूतले शीतयुक्ते
भस्मस्तूपे विरमति भृशं धूमयोनावकाले ।
अस्थिस्पर्शिन्यसमपवने स्वापकामस्य हा, मे
निद्राऽत्यन्तं व्रजति विधुरा शैशिरीयामिनीषु ॥ १२ ॥

वृत्तिर्वासो भवनमगदं वर्ष्म विद्याप्रकाशं
सर्वञ्चैतज्जनहितविधावाद्यकल्पः स्वराज्ये ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रायो लोकः कथयति कथाः सम्पदुल्लासगर्भा
दौर्भाग्यान्मे निखिलमतथं स्वप्नमेव व्यनक्ति ॥ १३ ॥

भार्या पुत्रा विरलविरले स्तोककाये नमेरौ
ग्रीष्मे तीक्ष्णं तपति तपने वह्निधूतौ नितान्तम्।
नालं भर्तुं तरलकरुणामूर्त्तयोऽप्युग्रतर्षा
येषां कूपाज्जलमपि भिया तान् सवर्णान् नमामः ॥ १४ ॥

पोत्री सम्पत्, पथि सहचरः सारमेयः सुबन्धु-
र्भिक्षा वृत्तिः कृषिविरहिता, पत्तनान्ते निवासः ।
उच्छिष्टाशी, शयनमवनौ, व्योम्नि नीशारतृप्ति-
र्निद्रा रात्रिर्मम हतधियो बोधलाभो विभातम्॥ १५ ॥

किं माधुर्यं पयसि, वसनं नूतनं किं विशिष्टं
किं पक्वान्नं पचति गृहिणी कीदृशं स्वागताय ।
कः संस्कारो गुणगणभरः, सभ्यता का, कला का
पृच्छन्नेवं मुखरतनयो मां कदर्थीकरोति ॥ १६ ॥

शम्बूकं वै रघुकुलमणिः स्वाशुगैर्निर्विभिद्य
श्लाघ्यं स्वच्छं चरितमभजच् श्रूयते सत्कथासु ।
किन्त्वेतन्मे दहति हृदयं यत् समर्थोऽपि देव-
स्तद्वंश्यानां निखिलकदनं नाकरोद् भारतात् किम्? ॥ १७ ॥

भद्राः सन्तश्चरत तदिदं राममेवानुसृत्या-
स्पृश्यान् भिन्द्ध्वं सकलभुवने श्रेयसे मादृशानाम्।
चित्तेऽस्माकं सकृदपि भवत्पुण्यधर्मे न खेदः
सर्वं लब्धं, किमपि हृदये नाग्रहो द्रष्टुमस्ति ॥ १८ ॥

(१९६७)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चक्रिचूडामणिः

नृत्यत्पादैर्मुहुरतितरां कम्पयन्ती धरित्रीं
घूर्णद्रागोन्मदिरनयनं निस्सहं भ्रामयन्ती ।
वर्षत्स्वेदाञ्चिततनुरुहा कामदा व्यस्तवर्त्मा
सा तप्तानां हरतु दुरितं रासभीमानवानाम्[१] ॥ १ ॥

स्वेदारम्भात् स्नपयति तनुं माधवे घोरघर्मे
स्निग्धच्छायां श्रयति विहगे गोव्रजे च द्रुमेषु ।
शून्यं घट्टं जहति रजके मारुते चालसार्द्रे
एको भूमौ विहरति खरः खे च जागर्ति भानुः ॥ २ ॥

लोके लीने तुहिनशयने कश्चियामान्तयामे
आर्तो भारादपि लघुगतिः प्राप्य रोधो द्युसिन्धोः ।
सायं वोढा पुनरपि धुरां प्रत्ययं संयमेन
गङ्गां भीष्मस्मरणकरुणापूरिताक्षीं करोति ॥ ३ ॥

ज्वालामालावति दिनपतौ माधवे चातपार्ते
तापात्त्यक्तं युवतियुवकैर्दाहशुष्यद्विलासैः ।
सत्त्वैरन्यैरपि मनसिजं विस्मृतं सेवमानः
कामारामस्त्वमिव भुवने राजसे त्वं खरेन्द्र ॥ ४ ॥

सद्योजाते कुलधरमुखे वीक्ष्य तालुव्रणं ते
माता तातः कुशलभिषजो बान्धवा मूढयत्नाः ।
लब्ध्वा पुण्यैरमृतपरमं त्वद्वधूस्तन्यदानं
गायन्तीष्टं तव कुलयशो जातमङ्के निधाय ॥ ५ ॥

त्वय्युल्लासात् प्रकृतिपरमे लुण्ठनोत्साहरागे
स्फूर्तिं लब्धुं विकिरति नवां होलिकाचूर्णमुष्टिम् ।

---

१. रासभी + मानवानाम्, रासभीमा + नवानां वा इति च्छेदः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ग्रावोत्कीर्णा वसतिरपि सा क्षोभिता त्वत्खुराग्रै-
र्द्यौर्दिग्वध्वो भुवनमचिरं धूलिदिग्धा रमन्ते ॥ ६ ॥

वज्राकारे पतति लगुडेऽनारतं पृष्ठशैले
'भू-भू'-नादैश्चरति समजेऽमर्षिणां कुक्कुराणाम्।
नाना ध्वानैर्भरति गगनं बाललोकेऽपि, कोऽन्यः
पत्री धावन्निव मृगयते वल्लभां लक्ष्यभूमिम्॥ ७ ॥

अश्वारूपं सहजमभजत् कामदोहाय संज्ञा
पूर्वं साऽसौ खरकरवधू वैखरीं विस्मरन्ती।
कामाध्याये तमतिशयितुं शस्यतेऽश्वा खरीं तां
मन्ये दिव्या युवतिरपि तन्नापदं मोहवृत्तेः ॥ ८ ॥

नागैर्नष्टं नरपतिकुले वीतगर्भाङ्कसुप्ते
ह्यश्वैरस्तं बहुविधनवे कल्पिते यन्त्रयाने।
गोभिर्लीनं जयति भुवनं दुग्धचूर्णे विदेशा-
देकः स्वस्थस्त्वमिह रमसे धूर्धरो रासभेन्द्रः ॥ ९ ॥

क्षिप्तो बन्धो दुरितपरमो जन्मसम्बन्धलक्ष्मा
दण्डश्चासौ व्यसननिकृतिर्निष्प्रयासं निरस्तः।
आधिव्यूहो भुवि मलधुरां प्रापितः क्वापि मार्गे
दिव्याह्लादे विहरति मुदा चक्रिणि स्नेहबन्धौ ॥ १० ॥

ज्योत्स्नास्निग्धे जगति गगने कीर्णमुक्ताप्रसूने
सुप्ते लोके नवतरुलता लासके गन्धवाहे।
मानच्छेदं विदधति पिके माधवे जृम्भमाणे
माद्यंश्चक्री स्मरमपि नवाभ्यास लोलं करोति ॥ ११ ॥

संख्यावृद्धिं भृशमहरहो वर्धमानां नियन्तुं
देशाधीना विफलमतयो दैन्यदग्धे स्वदेशे।
सेवेरंस्ते यदि तव विधिं श्रद्धया सिद्धिकामा
एषा नश्येदचिरमुदिता रक्तबीजी विपत्तिः ॥ १२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पार्श्वस्थानामपि कतिपयान् पञ्चषान् वीक्ष्य दृप्यं-
स्तारोद्गारैः प्रतिपदनवोत्कर्षशौण्डः प्रणादैः ।
स्वैराचारः स्फुरितनयनस्ताण्डवालीढभावः
प्राजातन्त्र्ये जयति सहठं रासभो वाऽथ नेता ॥ १३ ॥

त्वज्जातीनां सहजनियतं कर्म यन्त्रैर्निषेव्य
पाश्चात्त्यास्ते यदि विफलतां त्वत्प्रसूतेर्ध्वनन्ति ।
पारम्पर्यव्रतविरहिते पश्चिमे वञ्चकेऽपि
देशः प्राच्यां लसति वसतिर्भारतो जन्मभूर्वः ॥ १४ ॥

यस्मिन्नर्चां व्रजति वृषभो, वन्दनीयो गरुत्मान्
मुक्ताशङ्कं भ्रमति परितो मूषको दूषकोऽपि ।
काकः पाकं सविधि लभते पुण्यवाहो वराहो
देशे तस्मिंस्त्वमपि सततं श्लाघ्यजन्मा रमस्व ॥ १५ ॥

गङ्गासिन्ध्वोरिह परिसरे भारते विस्तृतेऽस्मिन्
गूढाचारोपचितकनकाः श्रेष्ठिनश्चेद् वसन्ति ।
नेतारस्ते तदनुगतिका राजभृत्याश्च सर्वे
तन्निःशङ्कं विहर वसतिस्त्वद्विधानामिहैव ॥ १६ ॥

कान्तां बन्धूनपि परिहरन् दिव्यमार्गे पुराऽसौ
यन्नामुञ्चच् शुनकमनुगं धर्मराजोऽपि पार्थः ।
तन्मा भैषीश्वर खरमणे त्वां विना नेतृवर्गो
भौमं दिव्यं किमपि कमते नैव भोक्तुं वरेण्यम् ॥ १७ ॥

लम्बौ कर्णौ वहसि नयने बिभ्रषे दीर्घदीर्घे
श्रोतुं द्रष्टुं ननु विनियतो जीवलोकं विधात्रा ।
श्रावं श्रावं स्वजननिकृतिं वीक्षमाणोऽभितश्च
वीतामर्षस्तदपि सहसे साधुवर्त्मा स्वदैवम् ॥ १८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मुक्ताकाशं शिरसि चरणे मेदिनी मुक्तसीमा
प्राणाधारं प्रकृतिसुलभं वारि दूर्वाङ्कुरञ्च ।
युक्त्या लोकास्तदपि भवतो दण्डबन्धं विधत्ते
दासेऽधीशाः सततमथवा वर्त्तितुं साधुचाराः ॥ १९ ॥

धूर्मालिन्यं वसतिरगृहं दैवमज्ञातहर्षं
त्रुट्यद्बन्धे वपुषि परुषो भेषजं दण्डपातः ।
सेवाधर्मो हृतनिशमहः स्तोकमस्वादु भैक्ष्यं
गङ्गाकूले तदपि चरितुं मुच्यसे बद्धपादः ॥ २० ॥

प्राचां गाथां मतिविलसितां प्राणिनो ये वहन्तो
ज्ञानालोकं तदवधिरमं घोषयन्तः शुकाभाः ।
नान्यत् किञ्चिल्लवमपि नवं तत्सतीर्थ्यं नयन्तो
विद्वांसस्ते यदिह कथिता रासभाः केऽधुनाऽपि ॥ २१ ॥

यासां मार्गे नवलवयसां लब्धुकामाः प्रसादं
मोघोद्योगा अपि सुरसिकाः स्थाणुवृत्तिं भजन्ते ।
तासाञ्चोलं नवकुचसखं मध्यसेव्यां शुकञ्च
बिभ्रत्पृष्ठे हससि युवकान् त्वं तटस्थोऽपि मन्दान् ॥ २२ ॥

दण्डैर्बन्धैः परुषवचनैर्भर्त्स्यमानोऽपि बालै-
र्धावं धावं वहसि सुमते तान् स्मरन् लोकतन्त्रम् ।
पृष्ठे छात्रानिव कुलपतिर्दुष्पथांश्चापि धीर
आयुष्कामः प्रणयविनयैस्तोषयत्येव यत्नैः ॥ २३ ॥

नेता योऽसावधमरजको नित्यपानानुभावो
मालिन्यानां धुरि परिवहन् पृष्ठदेशासनोऽपि ।
दण्डाघातैर्व्यवसितविधिर्घासमुष्टिं विकीर्य
प्राजातन्त्र्ये जनमिव खलस्त्वां कदर्थीकरोति ॥ २४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रत्यन्ताद्रीन् मरुमपजलं प्रान्तरं शून्यवर्त्म
नद्याः कूलं विपिनमथवा लीलया सेवमानाः ।
जायाजीवाश्चलवसतयस्त्वामवाप्यैकमित्रं
नाधिक्षामे पथि वसुमतां स्तोकमप्युत्सहन्ते ॥ २५ ॥

कामं लोको हसतु भवतो वर्तमानं सहेलं
त्वत्पूर्वेषां प्रथितमहसां साक्ष्यभृद्भूतकालः ।
पौलस्त्ये त्वामुपरि शिरसां साभिमानं दधाने
के देवानां भयहतगिरो नानटन् क्लैब्यलीलाम् ॥ २६ ॥

श्लिष्यद्वर्णं तव मुखबिलान्निस्सृतं तूर्यनादं
श्रावं श्रावं यदि कतिपये गीतिमाध्वीं स्वदन्ते ।
नैवाश्चर्यं यदिह बहवः सन्निशम्याङ्ग्लभाषां
दुस्तात्पर्यामपि हितकरीं मन्वते भारतीयाः ॥ २७ ॥

अन्यद् दूरे तदिह रुचिरं स्थानमादर्शदर्श-
मेलातालीवनपरिसरं वारिनाथोर्मिधौतम् ।
आर्ये देशे नवमभिधया 'रासभोल्लासनादं'
लब्ध्वा युक्त्याऽप्रतिहतमतिः पूरयातृप्तकामम् ॥ २८ ॥

यद्वै सत् तन्निखिलमसतो व्याहरन्तीह नव्याः
प्राञ्चो द्वन्द्वं तमसि नियतं पत्स्यमानं विदन्ति ।
यादृग्यत्तद् ध्रुवमवितथं मोहमूलं यदैत-
दादावन्ते प्रतिनिधिरतस्त्वं तवायं विलासः ॥ २९ ॥

दुर्भिक्षेऽस्मिन् विलसति शठे सर्वजीवान्तकारे
निर्दूर्वायां भुवि परिचरन् मा गमः शोकभूमिम् ।
विस्तीर्णेयं जलधिवसना भूरिभैक्ष्या विदेशा
मद्भिक्षुल्लं भुवनविदितञ्चापनेतुं क्षमः कः ॥ ३० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हृद्यैः पद्यैः सरसमधुरैः सत्पताकैः सदङ्कै-
र्दृश्यैः श्रव्यैरमृतभरितैर्वर्णनाचारुवृत्तैः ।
ऐतिह्यैर्वा नृपकुलकथाभासुरैर्दिव्यकल्पैः
किं साहित्यैर्यदि विरहितं त्वद्यशः कौमुदीभिः ॥ ३१ ॥

हिंस्रान् सत्त्वान् विरलविरलान् पक्षिणो वा भुजङ्गान्
संज्ञाशेषानपि बहुविधान् प्राणिनः पालयन्तः ।
एतच्चिन्त्यं यदिह सुधियो जन्तुशालासु गोप्तुं
सेवामार्गप्रथितपथिके त्वय्युपेक्षां वहन्ति ॥ ३२ ॥

भ्रान्ते चित्ते स्खलति चरणे मूर्ध्नि सङ्कम्पमाने
मन्त्री मुक्तो यदिह रमते राज्यपालासनेषु ।
त्वामारम्भादपि सतिमिरं वार्धके गर्तलीनं
कस्माल्लोको दिशति न दिशं त्वत्पुरस्कारयोग्याम् ॥ ३३ ॥

अस्यां योनौ यदि न भवताऽऽसादितं पुण्यसूति
मा खेदैर्मा व्यसनविकलो मुञ्च तद्धैर्यकन्थाम् ।
सत्यं शास्त्रं यदि भगवती साऽप्यवन्ध्या श्रुतिश्चे-
दात्मायत्तं कुलपतिपदं विद्धि जातः पुनस्त्वम् ॥ ३४ ॥

राजस्त्रीणां नवलरुचिषु क्लृप्तवेषांशुकेषु
श्यामच्छाया रजकतनयाऽऽयामपुष्टाङ्गयष्टिः ।
त्वामारूढा चपलजघनस्पर्शमोहश्लथाङ्गं
कच्चित् चित्ते पुलकभरिते संस्मृतिं वा तनोति ॥ ३५ ॥

वर्षद्वारे नभसि सघने संस्थितो द्वारभूमौ
शीते स्फीते तुहिनपवनेऽनावृतो हृष्टरोमा ।
ग्रीष्मोन्मादे दहनकिरणे धावमानो वृषार्के
त्वं निःशङ्कं प्रतिनिधिरहो भारतीयप्रजानाम् ॥ ३६ ॥

(१९६८)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रत्यन्ताद्रीन् मरुमपजलं प्रान्तरं शून्यवर्त्म
नद्याः कूलं विपिनमथवा लीलया सेवमानाः ।
जायाजीवाश्चलवसतयस्त्वामवाप्यैकमित्रं
नाधिक्षामे पथि वसुमतां स्तोकमप्युत्सहन्ते ॥ २५ ॥

कामं लोको हसतु भवतो वर्तमानं सहेलं
त्वत्पूर्वेषां प्रथितमहसां साक्ष्यभृद्भूतकालः ।
पौलस्त्ये त्वामुपरि शिरसां साभिमानं दधाने
के देवानां भयहतगिरो नानटन् क्लैब्यलीलाम् ॥ २६ ॥

श्लिष्यद्वर्णं तव मुखबिलान्निस्सृतं तूर्यनादं
श्रावं श्रावं यदि कतिपये गीतिमाध्वीं स्वदन्ते ।
नैवाश्चर्यं यदिह बहवः सन्निशम्याङ्ग्लभाषां
दुस्तात्पर्यामपि हितकरीं मन्वते भारतीयाः ॥ २७ ॥

अन्यद् दूरे तदिह रुचिरं स्थानमादर्शदर्श-
मेलातालीवनपरिसरं वारिनाथोर्मिधौतम् ।
आर्ये देशे नवमभिधया 'रासभोल्लासनादं'
लब्ध्वा युक्त्याऽप्रतिहतमतिः पूरयातृप्तकामम् ॥ २८ ॥

यद्वै सत् तन्निखिलमसतो व्याहरन्तीह नव्याः
प्राज्ञो द्वन्द्वं तमसि नियतं पत्स्यमानं विदन्ति ।
यादृग्यत्तद् ध्रुवमवितथं मोहमूलं यदैत-
दादावन्ते प्रतिनिधिरतस्त्वं तवायं विलासः ॥ २९ ॥

दुर्भिक्षेऽस्मिन् विलसति शठे सर्वजीवान्तकारे
निर्दूर्वायां भुवि परिचरन् मा गमः शोकभूमिम् ।
विस्तीर्णेयं जलधिवसना भूरिभैक्ष्या विदेशा
मद्भिक्षुत्वं भुवनविदितज्ञापनेतुं क्षमः कः ॥ ३० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हृद्यैः पद्यैः सरसमधुरैः सत्पताकैः सदङ्कै-
र्दृश्यैः श्रव्यैरमृतभरितैर्वर्णनाचारुवृत्तैः ।
ऐतिह्यैर्वा नृपकुलकथाभासुरैर्दिव्यकल्पैः
किं साहित्यैर्यदि विरहितं त्वद्यशः कौमुदीभिः ॥ ३१ ॥

हिंस्रान् सत्त्वान् विरलविरलान् पक्षिणो वा भुजङ्गान्
संज्ञाशेषानपि बहुविधान् प्राणिनः पालयन्तः ।
एतच्चिन्त्यं यदिह सुधियो जन्तुशालासु गोप्तुं
सेवामार्गप्रथितपथिके त्वय्युपेक्षां वहन्ति ॥ ३२ ॥

भ्रान्ते चित्ते स्खलति चरणे मूर्ध्नि सङ्कम्पमाने
मन्त्री मुक्तो यदिह रमते राज्यपालासनेषु ।
त्वामारम्भादपि सतिमिरं वार्धके गर्तलीनं
कस्माल्लोको दिशति न दिशं त्वत्पुरस्कारयोग्याम् ॥ ३३ ॥

अस्यां योनौ यदि न भवताऽऽसादितं पुण्यसूति
मा खेदैर्मा व्यसनविकलो मुञ्च तद्धैर्यकन्थाम् ।
सत्यं शास्त्रं यदि भगवती साऽप्यवन्ध्या श्रुतिश्चे-
दात्मायत्तं कुलपतिपदं विद्धि जातः पुनस्त्वम् ॥ ३४ ॥

राजस्त्रीणां नवलरुचिषु क्लृप्तवेषांशुकेषु
श्यामच्छाया रजकतनयाऽऽयामपुष्टाङ्गयष्टिः ।
त्वामारूढा चपलजघनस्पर्शमोहश्लथाङ्गं
कच्चित् चित्ते पुलकभरिते संस्मृतिं वा तनोति ॥ ३५ ॥

वर्षद्वारे नभसि सघने संस्थितो द्वारभूमौ
शीते स्फीते तुहिनपवनेऽनावृतो हृष्टरोमा ।
ग्रीष्मोन्मादे दहनकिरणे धावमानो वृषार्के
त्वं निःशङ्कं प्रतिनिधिरहो भारतीयप्रजानाम् ॥ ३६ ॥

(१९६८)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृषकः

पान्थः स्विन्नाङ्गयष्टिर्व्रजति तरुकुलं मार्गमुन्मुच्य तप्तं
मीलन्नेत्रो निकुञ्जं श्रयति रविकराद् गोव्रजो भीतभीतः ।
शाखापत्रेषु लीना विरतकलरवाः शेरते पक्षिणोऽपि
कोऽयं क्षेत्रे तथाऽपि प्रतपति सहठं विस्मृताशेषबन्धः ॥ १ ॥

वर्षारम्भे श्रयति भवनं वारिताम्भोऽन्यलोके
हेमन्ते वा तरलपवने तूलगर्भान्तरस्थे ।
ग्रीष्मे दीर्घं श्वसिति विकलं सेचितान्तर्गृहे वा
कोऽस्मादन्यः क्षपयति वयः क्षेणकोणेऽस्ततन्द्रः ॥ २ ॥

यस्यायासैः श्रमजलभरैर्भूरियं भूतधात्री
त्यागाद्यस्य प्रथितविभवा हेमपुत्रा जगत्याम् ।
केन्द्रस्थो यो भुवनमखिलं जीवयत्यात्मधाम्ना
दैन्यार्तोऽसौ तपति कृषको न्यक्कृतोऽस्माभिरेषः ॥ ३ ॥

क्षेत्राजीवस्तदपि धनिनो याचते शोणदृष्टीन्
उत्पाद्यान्नं स्वपिति बहुधाऽप्येकमुष्ट्यन्नदीनः ।
सेवन्ते यं विहितनियमा आश्रमा वृत्तिहेतोः
शिष्टम्मन्यै-'र्वृष' इति हठाद्धस्यते सोऽयमद्य ॥ ४ ॥

हत्वा हत्वा प्रतिपलमये लुण्ठका यस्य भाग्यं
संस्तूयन्ते च्छलबलकलाः श्रेष्ठिनः शासका वा ।
साधिक्षेपं कृतकसुहृदस्तेऽपि सोत्प्रासमेनं
ग्रामीणं वा वृषभमथवा घोषयन्तो हसन्ति ॥ ५ ॥

प्राजातन्त्र्ये सरलचरितं घातयन्तोऽपि यत्नैः
शाठ्याजीवास्तदपि परितः साधुवादं लभन्ते ।
प्रायोऽधोऽधो निपतति यथा भूमिपुत्रोऽयमार्त
उच्चैरुच्चैस्तदुदयकथा ते तथा कीर्तयन्ति ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भूमिं कर्षन्नपि निरलसं सम्पदां वर्षुकोऽपि
क्षेत्रस्वत्वं तदपि लभते नैव दुर्दैवदष्टः ।
धिक् तान् षण्डानविदितरसान् क्षेत्रजोल्लासदर्पान्
क्षेत्रं दृष्ट्वा परवदपि ये स्वामिसंज्ञां वहन्ति ॥ ७ ॥

भारेणार्ता नवमपि वयो वार्धके पातयन्ती
श्वेतश्मश्रुः स्खलति विवशा यत्तनुर्मुक्तचेष्टम् ।
सोऽयं वीतं स्मरति बहुधा वर्त्तमानाद् बिभीतो
मोघायासो विनिहितफलः कुण्ठितोत्साहबन्धः ॥ ८ ॥

यत्रानिच्छन्नपि जडमतिः पाठ्यते हेमपुत्रो
विद्याकामः कृषकतनयो रुध्यतेऽकिञ्चनत्वात् ।
प्राजातन्त्र्ये गुरुरपि वटुं पाठितुं न स्वतन्त्रो
दैन्यं सम्पद् दलति परुषा शारदामन्दिरेऽपि ॥ ९ ॥

तस्यामुर्व्यामपि किमु जनाः कामदोहं कमन्ते
श्रेयः प्रेयः श्रियमविपदं सख्यमच्छद्म वापि ।
धर्म्यादर्शं सहजहृदयानन्दनं सद्विवेकं
यस्यामित्थं तपति कृषको लोकधर्माश्रयोऽपि ॥ १० ॥

ईहन्तेऽस्मादपि किममरा वेदयागप्रतिष्ठां
विद्यातीर्था किमिव गुरुवो ज्ञानदीपप्रभां वा ।
आर्यादर्शं किमु हतमना वोढुमेष प्रशक्तो
निर्वेदात्मा निकृतिवसतिर्लोकसम्भारहीनः ॥ ११ ॥

नेतारो ये वितथवचनैर्दुःखिनस्तान् विलुण्ठ्य
कर्तव्यानामिव परिणतिं दाम्भिकाः संलभन्ते ।
धिक् कुर्वन्तः परिषदि मुधा वाऽथ दुर्दैवमेव
क्षिप्त्वाऽऽत्मानं तरलचषके ते क्षिपन्ति स्वभारम् ॥ १२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गेहे नान्नं तदपि सलिलं नैव पातुं निदाघे
घुष्यन्ते च प्रतिदिशमहो योजनाश्चित्ररूपाः ।
आजीवार्थं वहति गुणिनो मातृभूमिं विपन्ना
वैदेश्यानामृणमपि यथा पातकं वृद्धिमेति ॥ १३ ॥

प्राजातन्त्र्ये यदि जनहितं चिन्त्यते साध्यते च
तन्नेतॄणां विशति जठरं सेवते वा कुबेरान् ।
नव्यं वर्षं नवनवकरैश्चण्डदुःशासनोत्थै-
र्गाथां कीर्तेः प्रतिदिशमिवाख्यापयत्येव देशे ॥ १४ ॥

केषां दुःखैर्द्रवितहृदयः साधुचेता महात्मा
निश्शस्त्रोऽपि प्रबलकटकव्यूहशत्रुं रुरोध ।
केषां हर्त्तुं विषमविपदो दास्यबन्धं विभिद्य
देवो गान्धी व्यतपदनिशं रामराज्याय देशे ॥ १५ ॥

किं स्वातन्त्र्येण तेन प्रतपति जनता दैन्यबन्धेषु यस्मिन्
किं कस्मै शासनं तत् प्रथयति सहठं नैव यत् सुव्यवस्थाम् ।
किं नेत्रा तेन लोको निपतति तिमिरे हीननेत्रेण येन
किं देशेनापि यस्मिन् श्रममपि विदधत् कर्मठो ग्लानिमेति ॥ १६ ॥

(१९७१)

मधुकर! ते दिवसा विगताः

मधुकर! ते दिवसा विगताः ।
चन्द्राननमाहरत् पीतिमाम्बरमपि सक्षतकान्ति ।
सापि हता नक्षत्रमालिका जगदारोपितभ्रान्ति ॥ १ ॥

व्यथयसि किं रणितेन लताः ।
कर्दमशेषाः सरसाः सरितः स्फुटिततलानि सरांसि ।
वनमपफलतरु वीक्ष्य विपन्नं किं विरमन्तु वयांसि ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शून्याः कूलभुवोऽपि हताः।
अधुना तुहिनविहीना वसुधा, रागं मनो जहाति।
कुण्ठितशोभा प्रकृतिरपर्णा निष्ठुरमनिलो वाति ॥ ३ ॥

दिशि दिशि रोदिति नीरवता।
क्षुधा कवलयति शैशवमधुना मधुना मूर्च्छति हेम।
कविता ज्वलति कविकरे दीना क्वादर्शं पश्येम?
विध्यति प्रतिहृदयं जडता! ॥ ४ ॥

(१९७३)

सैन्यप्रयाणम्

समरनटतटद्वये स्वकीर्त्तिं खरकरवालमुखेन लेखबद्धाम्।
बहुविधनृपसत्कृतोद्यमानां लिखितवतां वरसादिनामनीकम् ॥ १ ॥

दृढतरमवलोक्य शौर्यदीप्तं सहठमरातिशमाय बद्धकक्ष्यः।
समरचपलवाद्यघोषरौद्रे द्रुतमभियानपथे बबन्ध रागम् ॥ २ ॥

तडिदनलसवाहिनी कथं क्व जिगमिषतीति जनोऽनुमाति यावत्।
पवनलहरिभिर्हरित्सु तावत् प्रतिगदितं ननु दग्धपूरजोभिः ॥ ३ ॥

चलति रिपुबले गृहान् समाजस्तरुमपहाय खगा व्रजञ्च गावः।
त्वरितमपगता हि कान्दिशीका अभिमुखमिच्छति वीक्षितुं यमं कः ॥ ४ ॥

अनलकवलिताः पुरोऽवसन्नाः वनपशुनिर्भयनित्यधामभीमाः।
करुणमहितकृत्यमावहन्त्यश्चिरमपकीर्तिकथा यथाबभूवुः ॥ ५ ॥

निगदितदुरितैव दक्षिणाशा दुरितघनस्तनितैरकालचण्डैः।
विततविमलमम्बरं प्रसह्य तिमिरतिरोहितमुद्ददर्श भीता ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनवरतमशङ्कितािधकारा मुहुरुपशल्यनिवासपाशबद्धान् ।
अभिलषितपशून् विकर्षयन्तो द्विषदनुगा गृहिणो व्यवाधयन्त ॥ ७ ॥

अभिनवसुकुमारभावभव्यां सकलकलामिव बिभ्रतीं स्वरूपे ।
पशुरिव तुलजापुरे भवान्या व्यभिनदसौ प्रतिमां मनुष्यसंज्ञः ॥ ८ ॥

रजनिरपि घनान्धकारभीमा प्रसभमुपेक्ष्य शशिप्रभामपीष्टाम् ।
समजनयदुलूकरौद्रघोषैर्मनसि भियं ज्वलितौकसां दुरन्ताम् ॥ ९ ॥

व्यपहतभयदुर्मदा दिनेऽपि सहठमरण्यजुषः कठोरचेष्टाः ।
अनलसमहितां धियं वितेनुः कुलशिशुरक्षिणि वार्धकेऽपि हिंस्राः ॥ १० ॥

अपजलभयविह्वलो रसस्ते वनहृदये शठसत्त्वभैरवेऽपि ।
विविशुरशरणा जना जनेभ्यः पशुमपि सेव्यतरं विमृश्यमानाः ॥ ११ ॥

अबटुगुरुकुलं हतश्रिगेहं मलिनरुचिः कुलरक्षितार्यकीर्तिः ।
अपसृतकृषका धरापि वन्ध्या प्रतिदिशमीतिकथामिवोचुरुच्चैः ॥ १२ ॥

इति दुरितपथः प्रतापदुर्गं शिवनृपवासमिवावरोद्धुकामः ।
पुलिनपरिसरं रिपुस्तटिन्या बलशिबिरैरकरोदशून्यदोषम् ॥ १३ ॥

कुर्वन् कण्डूतिरागात् सरलनवतरून् निस्त्वचः स्थाणुकल्पान्
सम्बद्धाः शाखिशाखाः फलकुसुमवतीर्मर्दयन् हेलयैव ।
श्च्योतद्दानाम्बुलुब्धान् मलिनमधुलिहो नन्दयन् कर्णमूले
सोऽसौ कुम्भीन्द्रकुम्भोत्कदनपटुमिभो याति हन्तुं मृगेन्द्रम् ॥ १४ ॥

(१९७४)

वसन्तः

कलमलिर्विपिनं नवपल्लवं परभृतो मधुकण्ठमिनो महः ।
नववयो जगदम्बरमच्छतां रसमये समये सुरभेर्दधौ ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गलितपत्ररुचिर्जडकश्मलो विरलधामभरोऽनिलबाधितः ।
भरति गन्तुमितः सुरभौ हिमः श्रितनये तनये श्रियमुत्तमाम् ॥ २ ॥

प्रचयपुष्पधनुः सुशिलीमुखं पिककलज्यमवाप्य समुल्लसन् ।
मधुसखो मृगयुर्वनमानिनीजनतपा नतपादपवल्लरिः ॥ ३ ॥

द्विजकुलालिकुलस्वनगीतिभिः किसलयाभिनवच्छविसम्पदः ।
प्रवयसस्तरवोऽपि समुत्सुकाः समुदिते मुदिते कुसुमाकरे ॥ ४ ॥

चलरसालरसालसमञ्जरीरुचिरता चिरतापहराऽधुना ।
सककुभाः ककुभा रुचिरेजिता ससरले सरले कुसुमाकरे ॥ ५ ॥

मलयजो रजनी रजनीपतिर्दधतु तेऽननुविद्धतटस्थताम् ।
जयति कोऽपि मधौ जगतीरमो मधुरिमा धुरि माधवसम्पदाम् ॥ ६ ॥

विमलपल्वलमज्जनकौतुकी घनपिशङ्गपरागविमण्डितः ।
मधुमरुच् श्रयते कुसुमावलिं नववशां विवशामिव यूथपः ॥ ७ ॥

कुसुमसम्बलशोभिवनस्पतौ वहति गन्धवहे स्मृतिसङ्कुले ।
अनभिधाधिरमे मधुमाधवे सदयिता दयिता अपि किं क्षमाः ॥ ८ ॥

नवरसालरसासवविह्वलप्रियतमामधुचञ्चुपुटस्पृशः ।
परभृता जगतीललिताधयः कलवचोलवचोरितसंयमाः ॥ ९ ॥

चलदपाङ्गशरैर्हृदयोन्मुखैर्मलयवातधुतैर्ललिताञ्चलैः ।
मदकलैरलकैरपि सुभ्रुवां निजगदे जगदेकमनोरथः ॥ १० ॥

(१९७४)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

युद्धवर्णनम्

मृगेन्द्रशावको मृगव्रजं प्रभञ्जनोऽम्बुदं
प्रभारथाधिरूढबालतिग्मदीधितिस्तमः ।
स्वलक्ष्यमाशुगो गरुत्मदन्वयो यथोरगं
बलाधिपः सपत्नमण्डलं व्यलोकयत्तथा ॥ १ ॥

नभस्यकज्जलाम्बुदच्छटाः प्रतीपसैनिका
निरन्तरप्रहारधारवर्षिणो दृषन्निभे ।
भटे स्वराज्यरक्षणव्रतेऽविभेद्यवर्मणि
विलूनविग्रहाः स्वयं कथावशेषतां ययुः ॥ २ ॥

ततः प्रवर्तिते समित्समुद्यमे बलाकुले
तदाद्यशस्त्रपातकौतुकं विनीय दुर्मदः ।
क्षतो निहत्य निर्हतोऽपि हेतियन्त्रणां भटो
मनागपि स्वविक्रमेऽन्वभून्न शत्रुमर्दने ॥ ३ ॥

द्विधाकृतोऽपि निर्भयं कृपाणपाणिराहवे
ननर्त शोणिताक्तवर्मसंहतोऽरिभैरवः ।
तनुत्रमेकतो विभिद्य खण्डितायुधो मुधा
समं हतेन सञ्चितं यशो दिदृक्षुरुद्ययौ ॥ ४ ॥

द्रुमं प्रभञ्जनः क्वचिन्न्यपातयन्महोच्छ्रितं
महीध्ररुद्धविक्रमो जहावसौ ह्रिया भुवम् ।
निहत्य पञ्चषाऽनुपात्तशस्त्रपङ्क्तिरात्मनि
जयाभिनन्दनैरभिष्टुतो भटो द्विषत्कृतैः ॥ ५ ॥

गृहीतकुण्ठितासिगर्हितक्षतः स्ववक्षसि
प्रसह्य हेलया निहत्य मूढविक्रमं भटः ।
कृपाणतिग्मतां प्रकाश्य तत्क्षणं परानपि
तदीयसंस्तुतिं विवक्षुराजघान साग्रहम् ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तडित् पपात वाहिनी तताम कामनावशा
जहास रक्तलोचनो जवात् पताकिनीपतिः ।
उदीर्णशम्बराश्रयैन्द्रजालिकावमोहिताः
कृपाणपाणयः कबन्धका विचेरुराहवे ॥ ७ ॥

अहो कृपाणतिग्मता द्विधाकृतेऽपि यद्भटे
बहिर्बभार नात्मसंस्तवं ह्रियेव तत्क्षतम् ।
सविस्मयं पुनस्तथैव यावदिष्यते क्रमो
विधाय तावदेव तुल्यधर्मतां हतोऽहसत् ॥ ८ ॥

श्रमाम्बुसीकराञ्चितासृगुत्करच्छटोल्लस-
न्मुखेन भैरवोऽपि साम्परायिकश्रियार्थितः ।
स्वजीवितैकसम्पदाऽभिनन्द्य तामनिन्दितां
त्रिविष्टपाङ्गनादृगुत्सवोत्सुकोऽभवद्भटः ॥ ९ ॥

स्वनामघोषरोषरोषितारिविद्धवक्षसो
महासि लेखनी लिलेख तत्प्रयाणमादरात् ।
हया हयैर्महासयो महासिभिर्भटा भटै-
र्निचख्नुरात्मविक्रमं वृतग्लहाः परस्परम् ॥ १० ॥

जगर्ज वाहिनी ननर्त वाजिराजिरुद्धता
बबन्ध संहतान्यबन्धने स्वकण्ठमण्डजः ।
चकर्ष वर्षदुष्णरक्तसक्थि फेरुमण्डली
रुराव वृद्धगृध्रचञ्चुलुञ्चितान्यचिल्लकी ॥ ११ ॥

निपीतकूलपद्धतिः प्लवोपचायसंसृति-
श्चमूर्घनस्वना स्वरंहसा भटावनीभृतः ।
पुनः पुनः प्रहृत्य सम्प्रधर्षिता पुनः पुनः
कृतार्थतामगान्न विद्रवाकुलेव वाहिनी ॥ १२ ॥

असिद्वयं करद्वये वनायुजो दृढासने
उरस्युरश्छदं शिरस्यनाहतायसं दधत् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अभीतिमण्डितो वधाध्वरावबोधपण्डितः
सपत्नमर्दनाय वर्धयन् स्वसैन्यविक्रमम् ॥ १३ ॥

बहिः पुरोऽधिपार्श्वमुच्चकैरधो निरन्तरं
विभिन्नरूपरूपितः स एक एव कालराट् ।
युगान्तकाशुशुक्षणिः सपत्नबन्धसङ्कुलं
ददाह वीरकाननं बलाधिपश्चमूपतिः ॥ १४ ॥

करालकालसन्निभं निरीक्ष्य वीतजीविता
गताः परेऽपरे विचित्य तत्कृपाणमस्पृहाः ।
अलातचक्रवाल एव यन्त्रचालितो यथा
हरन् द्विषो भरन् यशश्चचार रुद्रताण्डवः ॥ १५ ॥

शिरो निपात्य सोत्सुकं विभिद्य बाहुमश्रमं
बहिर्विपाट्य वर्मगूहितं द्विषामुरस्स्थलम् ।
स्वयं क्षताङ्गजद्रवस्रवन्निषेकसिञ्चितो
गृहीतवीरवेष एव वीरसाह्वयो रसः ॥ १६ ॥

(१९७४)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधरभास्करवर्णेकरः

— रामदासः
(१९७२)
— जिजा
(१९७२)
— निदाघः
(१९७२)
— श्रममाहात्म्यम्
(१९७७)
— श्रमयोगः
(१९७७)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रामदासः

यद्रूपेण महौजस्कः क्षात्रभावः परन्तपः ।
प्राप्तुं भूयस्तपःशक्तिं ब्राह्मीं मूर्तिमिवाश्रितः ॥ १ ॥

भक्तिप्रियोऽनिकेतश्च वसुधैककुटुम्बकः ।
लोकप्रपञ्चनिरतस्तथाऽप्येकान्तमाश्रितः ॥ २ ॥

जाग्रद्दिवानिशं बाह्यान्तरारिदमनोद्यतः ।
रात्रिबुद्धं दिवासुप्तं नूनं संयमिनं हसन् ॥ ३ ॥

गोदावरीसरिन्नीरे यो निमग्नार्धविग्रहः ।
जपमग्नो जनैर्मेने जपयज्ञः सविग्रहः ॥ ४ ॥

तिष्ठन्नेकेन पादेन ह्योमध्यन्दिनमोदयात् ।
सहस्रपादमुद्यन्तं कुर्वँल्लज्जारुणप्रभम् ॥ ५ ॥

गोदावरीसरिन्नीरे तिष्ठन् तिष्ठद्रु यो बभौ ।
जटालः श्मश्रुलो मूर्तस्तिष्ठद्व्योम इवोज्ज्वलः ॥ ६ ॥

ऊर्ध्वचन्दनरेखाभ्यां भालस्थाभ्यां विरोधिनोः ।
तुल्यत्वमादिशन्नूनं प्रपञ्चपरमार्थयोः ॥ ७ ॥

तीर्थाभिषेकपूतं स्वं वपुर्भूयोऽपि भूतिमत् ।
कृत्वा दिशन् सहावस्थां पावित्र्यैश्वर्ययोरिह ॥ ८ ॥

रघुवीरगुणग्रामं क्रमशः संस्मरन्निव ।
चलदोष्ठपुटं नित्यं भ्रामयन् जपमालिकाम् ॥ ९ ॥

ब्रह्मचर्यव्रतप्राप्तं दण्डमुद्यम्य पैप्पलम् ।
तर्जयन्निव निर्भीकः सर्वान् धर्मरिपून् सदा ॥ १० ॥

अष्टमूर्तेरपावित्र्याद् रक्षन्नापोमयीं तनुम् ।
वज्रसारे दधन्मुष्टौ तीर्थोदककमण्डलुम् ॥ ११ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पाञ्चभौतिकपिण्डस्य धारणार्थमयाचत ।
पञ्चमुष्टिमितं धान्यं योऽन्वहं गृहपञ्चके ॥ १२ ॥

रघुवीरजयोद्घोषं गर्जन्नुच्चैर्गृहे गृहे ।
रामदासशुभोपाधिं प्रापोपाधिक्षयेऽपि यः ॥ १३ ॥

पदस्थपादुकायुग्मोत्थितैश्चटचटायितैः ।
निर्दिशंस्तीरसञ्चारे धर्मस्य त्वरितां गतिम् ॥ १४ ॥

आशीर्वचनसंयुक्तां यदीयां सहसोदिताम् ।
ब्रह्मवर्चस्विनीं पुण्यां वाचमर्थोऽनुधावितः ॥ १५ ॥

कञ्चित् पञ्चत्वमापन्नं नरमुज्जीव्य लीलया ।
यो व्याञ्जयत् स्वसामर्थ्यं राष्ट्रसञ्जीवनक्षमम् ॥ १६ ॥

येनाप्रपादमाधाय कौपीनं गैरिकारुणम् ।
अरुणेनेव निर्दिष्टः स्वातन्त्र्याहर्नवोदयः ॥ १७ ॥

श्मश्रुलेन जटालेन स्वाननेन च यो बभौ ।
धूमावृतो महातेजा यज्ञाग्निरिव जङ्गमः ॥ १८ ॥

नवोदितः समर्थोऽसौ विश्वामित्र इवापरः ।
प्रबोधयन् महाराष्ट्रं मित्रवन्मन्त्रवद्गिरा ॥ १९ ॥

धगद्धगद्विनिर्याता प्रलयङ्करदाहभृत् ।
ज्वालेव सर्पसत्रस्य यद्वाणी रणकर्कशा ॥ २० ॥

धीरगर्जनया लोका येन सर्वे प्रबोधिताः ।
नवोदितेन मेघेन सिंहा इव गुहाशयाः ॥ २१ ॥

धर्मराज्याग्रदूताभं यमासेतुहिमाचलम् ।
सञ्चरन्तं प्रतिक्षेत्रं प्रतिपादं नतो जनः ॥ २२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तिमिरनिचयमग्रे रत्नसूमण्डलेऽस्मिन्
कथमपि स सुधांशुर्वारुणो हन्ति दोषम्।
जगति परमशेषध्वान्तविध्वंसनार्थं
दिनमणिरिव नान्यः कोऽपि पुण्यप्रतापी ॥ २३ ॥

सन्मन्त्रजागरविनिर्गतनेत्रमुद्रो
लोकोऽखिलः कमपि मानवबन्धुलोकम्।
सह्योदयाद्रिशिखरे समुदीयमानं
भास्वत्सहस्रकरमीक्षितुमातुरोऽभूत्॥ २४ ॥

(१९७२)

जिजा

विहितमङ्गलगाहनभास्वरा
रुचिरकुङ्कुमचन्द्रकलाधरा।
अरुणवस्त्रयुता शुशुभे जिजा
शरदुषा इव सर्वमनोहरा ॥ १ ॥

धवलपाटलनीरसरोरुहै-
र्विहितमङ्गलकुन्तलभूषणा।
मुखविलोचनपद्ममयी जिजा
सपदि सा ददृशे सरसी यथा ॥ २ ॥

विविधहीरकमौक्तिकभूषणै-
र्हृदयसन्निहितैर्विरराज सा।
गुणवती मृदुमञ्जुलभाषिणी
सदुपमानगणैः कविता यथा ॥ ३ ॥

नयननीरभृशार्द्रमुखी जिजा
पतिपुराभिमुखी समदृश्यत।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विषमसह्यशिलोच्चयमार्गगा
गिरिनदीव महार्णवगामिनी ॥ ४ ॥

पतिमिताऽमितसम्मदमानसा
तदवलोकनमोदितमानसम् ।
तदुदितेङ्गितमात्रवशंवदा
प्रथमसिद्धिरिवोत्तमकर्मिणम् ॥ ५ ॥

अथ चिरन्तनपुण्यकृतां सतां
युगयुगान्तरसञ्चितकर्मणाम् ।
सुपरिपाकमिवोत्कटपिण्डितं
कमपि गर्भमुवाह जिजा शिवम् ॥ ६ ॥

श्रुतिरिवाद्भुतमन्त्रबलान्विता
विजयभाग् रणनीतिरिवोज्ज्वला ।
प्रखरवीररसा कविता यथा
प्रबलगर्भधरा शुशुभे जिजा ॥ ७ ॥

(१९७२)

निदाघः

अथ मधौ हि विलासविमूर्च्छिते
तपनदीधितितापभयावहः ।
समय उष्णतयाऽतिविशोषको
दहनबन्धुरिवाभिययौ द्रुतम् ॥ १ ॥

रविमवेक्ष्य सुतप्ततरं भृशं
मरुदियाय स तद्गुणतां स्वयम् ।
बत बत क्षमया प्रथिता क्षमाऽ-
भवदसौ सहसा ध्रुवमक्षमा ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

खनितुमेव हि कूपतलं श्रमी
विवरमेत्य भुवो भृशशीतलम्।
सदनशेखरसंस्थितशिल्पिनम्।
रविकराभिहतं समुदीक्षते ॥ ३ ॥

सुघटिता समता हि निदाघतः
सकलसज्जनवृन्दसमीहिता।
विनिहिताः सदनेष्वखिलैर्यतो
धनिभिरप्यधनैरिव मृद्धटाः ॥ ४ ॥

क्षणश एव यथा रविरुच्चकैः
समधिरोहति तुङ्गनभोगिरिम्।
जगदिदं स्वकरैरपकर्षयन्
नयति सन्निधतामिव चात्मनः ॥ ५ ॥

रविकरैरदयं युगपद्धृतं
सकलमीनसरोवरजीवनम्।
प्रखरतापभृतां दहनात्मनां
हतबलेषु कुतः करुणाऽसताम्॥ ६ ॥

तरणिना हि धरान्तरसंस्थितान्
सकलरत्ननिधीनभिवीक्षितुम्।
निजसहस्रकरैरिव दारिता
कठिनमृत्कवचाऽपि वसुन्धरा ॥ ७ ॥

तपनदीधितितापभृशाकुलं
पशुकुलं विनिविष्टमहर्दिवम्।
तरुतले बहुपल्लवशीतले
पिहितचक्षुरहान्तमपेक्षते ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुषमयाऽमरराज हरिद् यया
बहु विराजति पाटलयोषसि।
प्रतिनिशं सकलास्वपि दिक्षु सा
स्फुरति नूनमहो दववह्निना॥ ९॥

मरुति वाति निशास्वतिदाहके
स्फुरति दावमहानलतेजसि।
न रविरस्तमगादिति शङ्कया
बहिरियाय न घूककदम्बकम्॥ १०॥

विगतपङ्कमये धरणीतले
तरणितापहतं खलु गोकुलम्।
न च विदूरमपैतुमभीहते
क्षणमहो लघुकूपसमीपतः॥ ११॥

सकलकूपसरःसरितां पयो
रविकरैरपशोष्य दिवानिशम्।
बहु पिपासितयेव दिवाऽधुना
किमदयं सकलं परिपीयते॥ १२॥

यदि सरो विजलं क्व सरोरुहं
न हि सरोरुहमेव कुतोऽलयः?।
यदलयो न कुतो मधुगुञ्जितं
न मधुगुञ्जितमेव कुतो मुदः?॥ १३॥

बक उपैति सरित्तटमुत्सुको
नियतदम्भतपश्चरणाय सः।
विगतनीरतया पुलिने पुनः-
र्भवति तस्य नितान्तविडम्बना॥ १४॥

समविशद् रविरश्मिविभर्जितः
प्रकुपितोऽहिरितीव पिपीलिकाः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वविवरं परिहाय भयाकुला
उदककुम्भसमीपमुपस्थिताः ॥ १५ ॥

विकचमेचकनीरजपुञ्जव-
न्निशिनभः प्रतिभाति च माधवे ।
तदभिलाषवशीकृतमानसा
इव समुत्पतिता उडुहंसकाः ॥ १६ ॥

तपनदीधितितप्ततनूभृतो
दिव इवाधिकघर्मपयःकणाः ।
उडुगणा हि निदाघनिशासु ते
परिलसन्ति सुमौक्तिकसुन्दराः ॥ १७ ॥

शशि भुजङ्गवदेव सरिद्धरोऽ-
पि स हरो सहेत महातपम् ।
शिरसि सन्तत धारमतो जलं
निहितमस्य जनैः प्रतिमन्दिरम् ॥ १८ ॥

(१९७२)

श्रममाहात्म्यम्

गोधान्यधनदानानि प्रशस्यान्यपि सर्वथा ।
शरीरश्रमदानस्य कलां नार्हन्ति षोडशीम् ॥ १ ॥

शमिनो दमिनस्तद्वद्यागिनो योगिनोऽपि वा ।
तेऽजस्त्रं श्रमिणः क्षेत्रे तुलां नार्हन्ति कर्हिचित् ॥ २ ॥

प्रश्राम्यन् पङ्किले क्षेत्रे पङ्कलिप्ततनुर्हि यः ।
स वन्द्योऽश्रमिणः साधोर्भस्माङ्किततनोरपि ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रमिणो व्रणचिह्नानि क्षेत्रेऽरण्ये रणेऽथवा ।
तानि प्रवालमालाभ्यो रोचिष्मन्ति विभान्ति मे ॥ ४ ॥

स्वश्रमोपार्जितं ह्यन्नं तन्नूनं परमामृतम् ।
न तत् क्षीराब्धिसम्भूतं न वा यज्ञहुतं हविः ॥ ५ ॥

श्राम्यन्ति गृहिणो यत्र सर्वेऽपि सततं गृहे ।
स्वच्छता सुव्यवस्था च राजते तत्र देवता ॥ ६ ॥

न तद् बिभर्ति पावित्र्यं गाङ्गं वा यामुनं जलम् ।
कृषीवलस्य तप्तस्य कायोत्थं श्रमवारि यत् ॥ ७ ॥

यदाज्याहुतिभिः पुण्यं दीर्घसत्रेष्ववाप्यते ।
नूनं शतगुणं तस्मात् क्षेत्रेषु जलसिञ्चनैः ॥ ८ ॥

श्राम्यन्तः खलु यज्वानः श्राम्यन्तः खलु योगिनः ।
श्राम्यन्त एव दातारः श्रीमन्तो न कथञ्चन ॥ ९ ॥

श्रीमन्तः श्रमवन्तश्च नैव तुल्याः कदाचन ।
भान्ति रत्नोपलैरेके श्रमवारिकणैः परे ॥ १० ॥

श्रीमतां श्रमहीनानां भारात् खिन्नां वसुन्धराम् ।
प्रीणयन्ति स्वकौशल्यैः श्राम्यन्तः कारुशिल्पिनः ॥ ११ ॥

जयन्ति ते कलावन्तः सन्ततश्रमनैष्ठिकाः ।
येषामद्भुतनिर्माणैर्जगदेतदलङ्कृतम् ॥ १२ ॥

धिग् धिक् तं मांसलं देहं रूपयौवनशालिनः ।
यो न धत्ते श्रमाभावाद् गात्रस्नायुकठोरताम् ॥ १३ ॥

न मुक्तासु न हीरेषु तत्तेजः खलु राजते ।
शिल्पिनः श्रमतप्तस्य स्वेदाम्बुकणिकासु यत् ॥ १४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मांसलोऽपि हि कायोऽसौ नूनं पाषाणनिर्मितः ।
न यः परिश्रमैरेति प्रस्विन्नाखिलगात्रताम् ॥ १५ ॥

प्रियं पद्मादपीशस्य नीहारकणिकाचितात् ।
मुखं स्वेदाम्बुसङ्क्लिन्नं शिल्पिनः श्रमजीविनः ॥ १६ ॥

अधनेनापि जीयन्ते श्रमिणा धनसम्पदः ।
सधनेन तु हीयन्तेऽश्रमिणा कुलसम्पदः ॥ १७ ॥

पदवाक्यमयी वाणी जिह्वयैव निगीर्यते ।
सा तु श्रममयी वाणी सर्वैरङ्गैरुदीर्यते ॥ १८ ॥

श्रमेण दुःखं यत्किञ्चित् कार्यकालेऽनुभूयते ।
कालेन स्मर्यमाणं तत् प्रमोदायैव कल्पते ॥ १९ ॥

पुष्पिण्यौ श्रमिणो जङ्घे गतिर्धीरोद्धता तथा ।
व्यूढं वक्षो दृढावंसौ वपुरारोग्यमन्दिरम् ॥ २० ॥

श्राम्यतः शुभकार्येषु जागरूकतयाऽनिशम् ।
श्रमश्रान्तानि नियतं दैन्यानि खलु शेरते ॥ २१ ॥

ज्ञानभक्तिविहीनोऽपि यः श्राम्यति सुकर्मसु ।
साधुरेव स मन्तव्यः सम्यग् व्यवसितो हि सः ॥ २२ ॥

(१९७७)

श्रमयोगः

योगिनामपि सर्वेषां पूजनीयो हि सर्वथा ।
एकाकी प्रतपन् क्षेत्रे श्रमयोगी कृषीवलः ॥ १ ॥

श्रमयोगी महायोगी श्रमिको धार्मिको महान् ।
श्रमाचारी ब्रह्मचारी श्रमशीलो हि शीलवान् ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्राम्यन्तोऽविरतं लोके श्रेयांसो वृषभा हि ते ।
अलसाः किन्तु न श्लाध्याः सिंहा गह्वरशायिनः ॥ ३ ॥

ब्रह्मर्षीणां कुले जातो भूदेवो नहि तत्त्वतः ।
अकुलीनोऽपि भूदेवो यो भुवं सम्प्रसेवते ॥ ४ ॥

पूजार्हो नरदेवानां भूदेवानाञ्च सर्वथा ।
श्रमदेवो महात्माऽसौ निशि जाग्रन् दिवा तपन् ॥ ५ ॥

भूदेवानां नृदेवानां देवानां स्वर्गिणामपि ।
श्रमदेवो हि पूजार्हः प्राणिनां वृषभो यथा ॥ ६ ॥

वृषो हि भगवान् धर्मो मुनीनामपि सम्मतः ।
परिश्राम्यत्यविश्रान्तं यदसौ लोकहेतवे ॥ ७ ॥

शोचनीयो यथा लोके पतितो निर्धनो जडः ।
श्रमात् पराजितो नूनं शोचनीयतरस्ततः ॥ ८ ॥

कृशोत्साहः कृशबलः कृशकर्मा कृशश्रमः ।
स एव हि कृशो नूनं न शरीरकृशः कृशः ॥ ९ ॥

ये शास्त्रपण्डिता लोके येऽथवा शस्त्रपण्डिताः ।
श्रमिकैरेव पाल्यन्ते देवैराराधका इव ॥ १० ॥

श्रमिकं निर्धनञ्चापि भूदेवा भूभृतस्तथा ।
वणिजोऽप्युपजीवन्ति श्रमिको जीवनप्रदः ॥ ११ ॥

(१९७७)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रेवाप्रसादद्विवेदी

— प्रतीक्षा
(१९६४)
— सीतापरित्यागः
(१९६८)
— सीताप्रस्थानम्
(१९६८)
— सीतामहाप्रयाणम्
(१९६८)
— शिवचतुर्दशी
(१९६९)
— मातुः स्तुतिः
(१९७८)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रतीक्षा

विनिद्रः स्वाध्याये क्व नु भवति मातस्तव कृपा-
कटाक्षाणां पात्रं कुमुदविशदानां शिशुरसौ।
यतोऽयं स्नेहश्रीरहितजनुषामप्यचरम-
स्तिरश्चीनां ग्रीवां सुखमपि विरिञ्चेर्विषहते॥ १॥

कदाऽहोरात्रं मे श्रवणकुहराद् बाह्यविषयै-
र्गृहीतात् कालाय क्षणपरिमितायापि जननि।
स्वकीयां वक्षोजाञ्चलपटुपिधानेन ललितां
गिरां गायत्रीं[1] तां श्रुतिसुभगतन्त्रीं न तिरयेः॥ २॥

तवैष स्वर्गङ्गातरलिततरङ्गप्लुतिपटु-
र्मरालानां सम्राड् विदधदपि मौक्तं कवलितम्।
कदा मेऽस्माच्चिताज्जडिमकलुषै रक्तिमवृतैः
स्वचञ्चूशृङ्गारं रचयति तमः[2] श्यामखनिजैः॥ ३॥

इमे[3] यैरञ्चन्ति स्फटिकधवलाश्चञ्चुपदयोः
सिता यद्वत् पद्मा[4] जननि तव वाहा अरुणताम्।
जनोऽप्येषोऽमीभिस्तव चरणरागैः क्व नु दध-
ल्ललाटीं स्वं पूतं रचयितुमलम्भूष्णुरलिकम्।॥ ४॥

मनोधाम्नि स्फीतारुणकिरणकिञ्जल्कसुभगं
कदा मातर्मेऽदस्तव चरणपाथोरुहवरम्।

---

१. गायत्रीं, गानमस्त्यस्यास्ताम्।
२. तमः अज्ञानम्।
३. चरणरागैः।
४. वा पुंसि पद्मम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वसौरभ्यासारप्रसृमरमुदां [५]भावमधुप-
व्रजानां लास्याय स्रुतमधुरसं भावि नितमाम्॥ ५॥

अपाङ्गप्रान्ताभ्यां तव पय इव प्रीतिविशदं
कदा स्मैर्यं मातः स्नपयति मदीयां मतितटीम्।
दृशोर्मे मालिन्यं क्षपयतितमामञ्चलमिदं
कदा व कश्मीरप्रभवसुरभि श्वेतिममृदु॥ ६॥

कदैकैकं मालास्फटिकमणि[६] माणिक्यमभयः
समारोहन् मेरुं [७]व्रजति तव विश्वेश्वरमयम्।
कदा वाऽसौ तस्मादुपरि निजरूपं तव शिवे
जगद्ग्रन्थिं ग्रन्थं प्रविशति शिशुर्वाङ्मयमयम्॥ ७॥

कदा वाऽस्मात् स्थानात् प्रतिकणमभिव्याप्तमखिलं
रहस्यं नैयत्यं विमलमतिरीक्षै तटगतः[८]।
अथ क्रान्त्या युक्तां जननि! दृशमास्थाय भुवन-
त्रये भ्राम्यन् स्वैरं रविशशिनमस्योऽस्मि भविता॥ ८॥
(१९६४)

सीतापरित्यागः

अथैकदाऽऽर्यः कृतदोहदव्यथामुपासमानः स विदेहनन्दिनीम्।
विमानशृङ्गाद्धगवाञ्छ्रियः पतिर्यथैक्षत ब्रह्मसरःसमुद्भवाम्॥ १॥

तदैव पौरेषु विसर्जितश्चरो विषेण दिग्धो यदिवापरः शरः।
उपेयिवांस्तं रघुवंशकेतनं महाविनाशाय नु धूमकेतनः॥ २॥

स तं प्रणम्य प्रथमं प्रजेश्वरं जयेति चोक्त्वा समतर्पयत्ततः।
अनुज्ञया तस्य विशुद्धवर्णया गिरा स्वचेतो व्यवृणोदिति ब्रुवन्॥ ३॥

---

५. भावाः कवित्वमया उन्मेषाः।
६. गुलिका।
७. मध्यमणिम्।
८. तटस्थः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रजाः प्रजानाथ पितेव पालयन् क्षितौ भवान् वा यदि शुद्धिभाजनम्।
शुचिव्यपाये यदि वा बलाहको द्वयं हि लोकस्य विलोचनोत्सवः ॥ ४ ॥

शरत्सु हंसा दिवसेषु भास्करः सुधांशुरह्नो विगमेषु दीव्यति।
नृनाथ कालेष्वखिलेषु पावनं यशस्तु ते दीव्यति दीप्रमोजसा ॥ ५ ॥

अनुक्षणं काञ्चिदचिन्तितां गतिं प्रयान्ति भूतानि, तथापि हे प्रभो।
धियः परिच्छित्तिमुदस्य तार्किकीमिमानि नैव प्रतियन्ति कुत्रचित् ॥ ६ ॥

यदीश्वरो मानवमभ्रविस्तृतां मतिं मनश्चापि च सिन्धुनिर्भरम्।
वितीर्य, कुर्यादविनश्वरं तनौ दुरत्ययेच्छां न तथापि स त्यजेत् ॥ ७ ॥

इमां प्रभो वेदितुमीश्वरो हि कः प्रवृत्तिवल्लीं मनसो नृजन्मनः।
तटं न यत्रास्ति न वाऽस्ति लक्ष्यभूस्तथापि या हन्त नदीयतेतमाम् ॥ ८ ॥

इति ब्रुवाणो जगदीश्वरस्य यच्चरो निजे न प्रबभूव वाक्क्रमे।
बभूव रामः किल तेन शङ्कितो न हि स्थितिस्त्रुट्यति वैशसं विना ॥ ९ ॥

स शान्तचेताः स्थिरधीः क्षणेन तं प्रसाद्य भृत्यं प्रियदर्शनः प्रभुः।
कृपाञ्चितैः प्रश्नवचोभिरार्जवादनाविलाचारपथोऽन्वकम्पत ॥ १० ॥

किमन्यदीयैरुत कर्मभिः स्वकैः प्रजासु शङ्का विषवल्लरीयति।
प्रसन्नचेता यतबुद्धिरात्मनः प्रभुश्च भूत्वा वद भद्र यद् यथा ॥ ११ ॥

तथाऽनुयुक्तः प्रभुणाऽप्यनीश्वरो निजे विधाय स्थिरतां रहस्यसौ।
विदेहपुत्रीं प्रति संशयालुतां विषं यथोद्गीर्य गतो विसंज्ञताम् ॥ १२ ॥

निशम्य दूतेन निवेदिताक्षरं प्रियातिरस्कारमयं च वाग्विषम्।
घनायसाघातमिवाप्य वारिभूर्विदीर्णवक्षा इव सोऽपि मूर्च्छितः ॥ १३ ॥

गवाक्षलग्नाम्बुरुहाप्तसौरभो मरुत् सरय्वा हृतपुण्यसीकरः।
प्रवीज्य तौ सानुशयः प्रियाकरो यथा मुहूर्तात् कृतवान् सचेतनौ ॥ १४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विसृष्टदूतो भगवान् स राघवो विलापकातर्यमवाप निस्सहम्।
विरौति चेतो निखिलस्य राक्षसीमवेक्ष्य वृत्तिं प्रियवैशसे रताम्॥ १५ ॥

अहो असंख्यैः कलुषैरुपद्रुतं नृजीवनं राष्ट्रपतिर्न यो नयैः।
व्यशोधयत् तस्य पदोपभोगिनो धिगेव सत्त्वं विजुगुप्सितात्मनः॥ १६ ॥

मनोवचःकर्मसु याऽऽर्यसंस्कृतिं सदैव शुद्धां भजते मनस्विनी।
न कम्पते धर्मणि मृत्युतोऽपि या जनोऽयमेनामपि हा जुगुप्सते॥ १७ ॥

ममैव किन्त्वत्र परिच्युतात्मनस्त्रुटिर्यदेषा जनताऽस्त्यशिक्षिता।
पितुः स दोषः शिशुरत्ति यद् विषं भिषग् हि वाच्यो यदि वर्धते रुजा॥ १८ ॥

किमत्र कार्यं विपरीतताकटुः स्थितिः समक्षं मम सम्प्रति स्थिता।
परित्यजानि स्वचितिं, जनानुत, व्रजानि वह्नौ यदि वाद्य वारिधौ॥ १९ ॥

समाजधर्मः स्थित एकतोऽन्यतो विभाति वैयक्तिकता च मत्पुरः।
उदस्यतामत्र लता द्रुमोऽथवा, परस्पराश्लिष्टतमात्मनोर्द्वयोः॥ २० ॥

तदेत्थमन्तश्चलमस्य वैशसाद् बभौ विभोरुत्तरकोसलौकसाम्।
यथा पयोधौ तरले प्रभञ्जनात् प्लवोऽथवा वारिरुहं सरोवरे॥ २१ ॥

स वृक्षवृत्तिर्जनताकृते प्रियां लतामिव त्यक्तुमनास्ततोऽभवत्।
भवन्ति चेतांसि महात्मनां सदा परार्थसम्पादनसौख्यभाञ्जि यत्॥ २२ ॥

ततः सतीं तां स्वविकारमूर्च्छितां महागजः पङ्कजिनीं यथा वहन्।
सभागृहं प्राप स पूरुषोत्तमो विसर्गरङ्गं स यथा नटोत्तमः॥ २३ ॥

विपक्वगर्भां च वधूं दृगम्बुभिर्निजैः ससंज्ञां च निरीक्ष्य मातरः।
निशश्वसुर्मुष्टिमतीं यथा महीं तरङ्गितां वीक्ष्य कृषाणचेतनाः॥ २४ ॥

कृतप्रणामान् विहिताशिषश्च तान् यथायथं संश्रितविष्टरानपि।
कथञ्चिदुद्भूतविवासवेदनाननिष्टभीतिर्निहि भाषितुं ददौ॥ २५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ततः कथञ्चित् कुलिशान्तरात्मतामवाप्य तेभ्यो मितसारवाक्पतिः ।
न्यशामयद् दूतमुखेन यच्छ्रुतं स्ववंशकौलीनविषं विशाम्पतिः ॥ २६ ॥

स वाग्विसर्गो विदधे द्विधाहृदो यथा समस्तानपि तान् सभासदः ।
भवन्ति कारुण्यवतां वपुर्भृतां मनांसि संवादशुभानि यत् सदा ॥ २७ ॥

निपीडिताः कर्णकुटीषु तद्वचोऽनलेन सर्वा अपि राममातरः ।
अमूमुहन्नन्तरतीतपन्नथो व्यलीलपन्नेवमुदस्तसंविदः ॥ २८ ॥

कथं विधातर्घनसारसन्निभामिमां कुलं शोधयितुं स्नुषामदाः ।
कथञ्च तत्राग्निनिभं विपद्व्रजं विधातुमेतान् महतो ग्रहानगाः ॥ २९ ॥

निषेकपाकं धरिणी वृषाकपेर्यथात्मजस्यास्य बिभर्ति मे वधूः ।
विधेऽत्र वृत्रासुरवत् कथं ततः कलङ्कवर्षोपलमाः सिसृक्षसि ॥ ३० ॥

क एष मार्गो निजरक्षणे जनो धृतव्रतं दूषयते निजाधिपम् ।
किमत्र कार्यं भगवानुषर्बुधो भवेद् दिधक्षुर्यजमानमेव चेत् । ॥ ३१ ॥

इति शकलितचित्तास्तास्तथैवानुजाता-
नविरलगलिताश्रूँल्लोकनाथः स दृष्ट्वा ।
स्वयमपि निजसर्गं वक्तुमीशां न चक्रे
भवति हृदयभूमौ मानवो मानवो हि ॥ ३२ ॥

मनसि विधृतमोहा सा सभा राघवाणा-
मपि वचसि तदासीदङ्कवीणेव मूका ।
न हि भवति मनुष्यस्यान्तरङ्गे निवासी
विकृतिषु परमात्मा पक्षपाती मृषासु ॥ ३३ ॥

(१९६८)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सीताप्रस्थानम्

मातृभिर्विहितमङ्गलक्रिये भ्रातृभिः स्वयमुदस्तसञ्चरे ।
यत्र वर्त्मनि रथः स संस्थितो धौतमेतदमराश्रुवृष्टिभिः ॥ १ ॥

तं निरस्तममतोऽथ लक्ष्मणो बाष्पपूरितदृगञ्चलो रथम् ।
आर्यधर्ममिव मौनिना हृदा यन्त्रवत् किमपि रोद्धुमायसत् ॥ २ ॥

राघवोऽपि शितिकण्ठवत्ततः क्ष्वेडपानमिव मीलितार्धदृक् ।
जानकीगतमुपांशु वैशसं तन्नितान्तपरुषं न्यपीपिबत् ॥ ३ ॥

रामवासभवनस्य देहलीमुद्गताश्रु मुहुरीक्षमाणया ।
सीतया प्रियमवीक्ष्य सा पुरी सूचिकेव नयने व्यभाव्यत ॥ ४ ॥

लक्ष्मणेरितरथाऽथ साऽचलच्चेतनेव रघुवंशिनां पुरः ।
तां विसृज्य बत पूश्च सा सतीं न व्यशिष्यत सुरद्रुहां पुरः ॥ ५ ॥

स्वस्य जीवनमखस्य जीवितं तां विसृज्य सुरभिं रघूद्वहः ।
दृश्यते स्म बत निष्परिष्क्रियो यूपदण्ड इव वेदिकाच्युतः ॥ ६ ॥

वस्तुतो यदि सुमानुषी सृतिः पद्मिनी श्रयति पद्मतां प्रिया ।
साऽस्ति चेद् यदि शिखा विभावसोरूष्मतां स्पृशति तत्र च प्रिया ॥ ७ ॥

सैव जीवनसुधांशुचन्द्रिका सैव संस्कृतिवसन्तकोकिला ।
तां विना न चरितार्थता सृतेः कल्पवल्लिमिव नन्दपावनेः ॥ ८ ॥

पूरुषोऽग्निपरमाणुरप्चितिः सत्प्रियैव ननु तत्र, तां विना ।
नामरूपकलनाप्रसूरियं संहिताऽपि ननु कच्छपीपयः ॥ ९ ॥

ज्योतिरिङ्गणमयूखतो हि या भास्करावधि विभाव्यते प्रभा ।
संविदक्षिणि ततोऽप्यसौ परा मातृशक्तिरनुबिम्ब्यते परम् ॥ १० ॥

तां हि दुग्धदशनो यथा जनः कश्चिदप्यतितरामधिष्ठितः ।
याति हन्त यजमानतां परां याति हन्त जनुषः कृतार्थताम् ॥ ११ ॥
(१९६८)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सीतामहाप्रयाणम्

ततः कविः कारुणिकः स्वकाव्योपसंहृतिं यद्वदुदीक्ष्य हर्षात्।
रामञ्च सीताञ्च निदर्श्य ताभ्यां वचःप्रसादं प्रददावितीव ॥ १ ॥

पुत्रौ श्रुतं यन्मम रामकाव्यं यस्तत्र रामः स हि राम एषः।
या तत्र सीता ननु सैव सीता भवत्सवित्री, न तु काचिदन्या ॥ २ ॥

तौ चक्षुरुन्मीलनपण्डितेन वाल्मीकिना सद्गुरुणा तदित्थम्।
स्वबिन्दुसिन्धू पितरौ पुरस्तात् सम्प्रत्यभिज्ञाप्य कृतौ कृतार्थौ ॥ ३ ॥

आनन्दसिन्धावनयोरिदानीं कः सेतुबन्धं रचयेत् कलावित्।
एकस्तटो यत्र स राम एव तटान्तरत्वञ्च बिभर्ति सीता ॥ ४ ॥

ज्ञात्वाऽपि तातं जननीं निजां तौ विलोकयामासतुरुद्गताश्रू।
रविं प्रति प्रीतिभृतोऽपि वृक्षाः शिरांसि भूमिं प्रति नामयन्ति ॥ ५ ॥

सोद्यानभूर्यद्वदुदास माता महाकविस्तत्प्रसवौ परन्तु।
उद्यानपालप्रतिमस्तदानीं तत्स्वामिने दातुमियेष हर्षात् ॥ ६ ॥

न यायजूकस्य परन्त्वदृष्टं स्प्रष्टुं कदाचित् क्षमते पुरोधाः।
रामाय तद् द्वावपि बालकौ तौ वर्णाश्रमाणां गुरवेऽदिशत् सः ॥ ७ ॥

स चापि वाल्मीकिवसिष्ठदृष्टिपरीक्षितौ प्राप्य सुतावहृष्यत्।
न पिण्डमात्रं नृपसन्ततीनां यद्धारते राष्ट्रपतित्वमेति ॥ ८ ॥

कथं न शिल्पोत्तममेतदत्र प्रशस्तिपात्रत्वमुपाददातु।
यत्रोपलः सूर्यमणिः, कविः स शिल्पी, वसिष्ठश्च परीक्षकोऽस्ति ॥ ९

स राजवंशो मिलितः सुताभ्यां तथा तदानीं निपुणं विरेजे।
लौहित्यसिन्धुद्वितयेन युक्तो विराजते हन्त यथैष देशः ॥ १० ॥

सीतातटस्थत्वविषाददिग्धा प्रसन्नता राजकुलस्य तस्य।
निदाघतप्तस्य सरोवरस्य प्रसन्नताया भगिनी बभूव ॥ ११ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तावश्रुणाऽर्घ्यं पटुसीत्कृतैश्च शुभागतं मातृजनेषु लब्ध्वा ।
यन्मङ्गलं प्रापतुरस्य दास्ये को नाम माङ्गल्यविधिः क्षमेत ॥ १२ ॥

मातामहस्यापि विना स्वपुत्रीं दौहित्रयोर्हन्त तयोः प्रसादः ।
जातोऽनवाप्तप्रतिके स्वशास्त्रे स्वभ्यस्तयोः शास्त्रकृतः प्रसादः ॥ १३ ॥

सा विश्वविध्वंसविरामभूमिः सा विश्वशान्त्यै पटु सामरस्यम् ।
ज्ञानक्रियाभक्तिमयी च काचिद् योगत्रिवेणीप्रतिमापि सैव ॥ १४ ॥

सा ब्रह्मकाव्ये मधुगीतिवीणा तत्तत्त्वधन्वन्यमृताम्बु सैव ।
तत्रास्ति बोधस्य न साधकत्वं प्रपत्तिमात्रं बत तत्र सर्वम् ॥ १५ ॥

तामेव मातृत्वदशां विदेहपुत्र्यां तदानीमुपलक्ष्य सर्वः ।
लोकः स्वरं केवलमेकमूचे "माता तु सीतैव चराचरस्य ॥ १६ ॥

"धन्याऽसि पत्यावथ पुत्रगर्भे धातुं स्वराष्ट्रस्य पतित्वमुच्चैः ।
कालप्रबुद्धा स्वयमेव या हि राज्यं समुत्सार्य वने तताप ॥ १७ ॥

रामाधिकौ रामसुतौ, न शंका, गतो वनं राम उदूढजानिः ।
इमौ तु गर्भाद्धि विदेहपुत्र्याऽनयैव सार्धं तपसां वनानि ॥ १८ ॥

किं नाम हेमात्र तुलाविधाने विनाग्निसंस्कारमिमौ विशुद्धौ ।
आस्तथ्यमेतद् यदियं पुरैव वह्नौ विशुद्धाऽस्त्यनयोः सवित्री ॥ १९ ॥

हन्त प्रजाराधनतत्परत्वे रामं प्रभुं कोऽतिशयीत लोके ।
यस्तत्कृते गर्भत एव सत्त्वरूपां प्रजां स्वां विनयत्यदभ्रम् ॥ २० ॥

सुदक्षिणायां रघुरेव तद्वच्छकुन्तलायां भरतो हि जज्ञे ।
अस्यामिमौ द्वौ ननु हेतुरत्र द्वयोस्तपांसि प्रसुवः पितुश्च ॥ २१ ॥

सा कूटनीतिर्ननु कोसलेन्द्रपुत्र्याः प्रवादो यदभूत् पुरा सः ।
सा यौवने नैव चकाङ्क्ष भूयः पौत्रेषु संस्कारकृते तपांसि ॥ २२ ॥

सा नैव रामस्य च लक्ष्मणस्य प्रसूतिभेदं रुरुचे ततश्च ।
एकप्रसूतिर्द्वयमत्र सून्वोरिदं स्ववध्वां निपुणा विलेभे" ॥ २३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इत्येवमादिप्रतिपत्तिमग्नो बभूव लोको हृदये तदानीम्।
गुणाय सर्वोऽपि जनः प्रणौति यद्यप्यसौ द्रुह्यति तत्प्रसूत्यै ॥ २४ ॥

स जनको जनकोपपराङ्मुखो दुहितरं हितरञ्जितभूतलाम्।
जनमनो नमनोदितपुण्यतामृतमथैक्ष्य बभूव कृतक्रियः ॥ २५ ॥

स रविवंशगुरुश्च सनातनस्थविरतां विरतामिव तत्क्षणम्।
न मनुते स्म न किञ्च सतीव्रतं तपसि काञ्चन काञ्चनतां गतम् ॥ २६ ॥

कुशलवप्रसवा तु निशम्य ता जनगिरो निजकीर्तिपरा अपि।
समतया मतया विदुषां दधे श्रुतिमतीति मतीन्दुकलां शुभाम् ॥ २७ ॥

तस्मिन् काले पतिपित्रादेः सान्निध्यं सूरेराद्यस्याश्रमतुल्यामथ भूमिम्।
दृष्ट्वा, शिष्टं कृत्यमदृष्ट्वा स्वं चान्यत् स्थूलं देहं स्वस्यै मात्रेऽदित्सत् सा ॥ २८ ॥

सा सर्वेभ्यो विनयमधुरं चाञ्जलिं मूर्ध्नि धृत्वा
न्यस्याशीर्भिः करकिसलयं चन्द्रकेतोश्च शीर्षे।
स्मेरं धृत्वा मुखसरसिजं शान्तभावा पुनश्च
भेजेऽभ्यासात् स्थिरसुखसमां पद्ममुद्रां सुभद्राम् ॥ २९ ॥

सम्प्रत्यस्याः पशुपतितया पाशमुक्तोऽन्तरात्मा
वन्द्योऽस्माकं भवति जहित स्थूलदेहान्ववायम्।
धन्यो रामः कुशलवसुता यस्य जाया त्रिलोकी-
माङ्गल्यात्मा व्रजति वपुषैवान्धकारात् परस्तात् ॥ ३० ॥

इत्येवं ते बहुविधवचःसेतुबन्धैः समेषा-
मस्रस्रोतः स्थगयितुमलम्भूष्णुतामीप्सवोऽपि।
शेकुर्नैव, द्रुतिमुपगतां चेतनामक्षिमार्गा-
न्निर्गच्छन्तीं प्रति तितउतां याति यत् सान्त्वनावाक् ॥ ३१ ॥

गाङ्गैस्तोयैरथ नयनजैर्दिग्धदिग्धैः पवित्रं
श्रद्धापुष्पैः शबलशबलं खातमेते विधाय।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तस्या गात्रं पुनरपि महीमातुरेवाङ्कशय्याऽऽ-
सीनं चक्रुर्न हि मृतवपुर्मन्यते योगमुक्तः ॥ ३२ ॥

सीता तस्मिन् स्वपिति पुनरप्यस्य विश्वस्य धर्म-
ग्लानिग्लान्यै श्रयितुमसकृद् देहबन्धं तमेव ।
इत्येवं सा मुनिजनसमित् पुत्रकान् सान्त्वयन्ती
सास्रं त्यक्त्वा पुनरपि सुमं प्राप तस्याः कुटीरम् ।॥ ३३ ॥

तस्य द्वारे निहितशिरसा केन वा नाश्रु मुक्तं
को वा नासीद्धृदयविपिने दावलग्नोऽत्र धीरः ।
कैर्वा मृत्स्ना शतशतमहातीर्थमृत्स्नेव तस्य
धृत्वा मूर्ध्नि स्वजनुरिदमाः प्रापितं धन्यतां न ॥ ३४ ॥

को वा वक्तुं प्रभवतु जगन्मातुरस्या यशांसि
केनावाप्तं मनुजवपुषि क्रान्तिमच्चक्षुरार्षम् ।
तस्याः पुण्यस्मरणसुधया पूरयेत्, पूरितुं चेत्
वाञ्छेत् कश्चित् स्वमतिसरितां विश्वधन्वप्रलुप्ताम् ॥ ३५ ॥

(१९६८)

शिवचतुर्दशी

हृदये तुहिनाचलात्मजामधिशीर्षं च शशाङ्कषोडशीम् ।
दधते स्मरशत्रवेऽस्तु ते भगवन्नद्भुतशिल्पिने नमः ॥ १ ॥

धनिकोऽस्मि महानहं भवानपि भैक्ष्याय महत्सु विश्रुतः ।
शिव! तेन गृहाण मेऽखिलं न खिलीकारविभीषितो भव ॥ २ ॥

वृषभोऽस्तु पिचण्डिलः पुनस्तव, सौभाग्यकडङ्गरैर्मम ।
भवताच्च स भूषितालिको दुरिताख्यैः सुवराटकैर्मम ॥ ३ ॥

मम शोभनकर्मपायसं भुजगेभ्यस्तव दातुमुत्सहे ।
अपि कल्मषकर्दमानिमान् प्रमथेभ्यो, दयसे यदि प्रभो ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यदि चर्म गजासुरस्य ते प्रतिसन्ध्यं नटनाय युज्यते।
प्रदिशामि तदर्थमात्मनो मतिजाड्यं तमसोऽपि मेदुरम्॥ ५॥

फणिनो यदि नाथ कङ्कणं भवते किञ्चन रोचतेतराम्।
हृदयं क्व ममोपयोक्ष्यते, शरणं ते चरणावुपेयुषः॥ ६॥

भवतः करपुण्डरीकयोर्डमरुर्यः शिव! डण्डमायितः।
लभतां क्षणविश्रमं स च प्रतिपत्त्यां मम वैखरीगिराम्॥ ७॥

शवभस्मनि तेऽस्ति चेद्रुचिः कुरु देहं मम भस्मसादिमम्।
स्मर एव स नूनमात्मवान्, प्रतिरोधो यदि वा स्तुतेर्महान्॥ ८॥

गणनायक एष ते प्रभो कृतिपाटीरवनीमतल्लिकाम्।
अधितिष्ठतु मे, स चाग्निभूरभिलाषद्रुकुटीमचर्च्चिकाम्॥ ९॥

विजया भजतां ममोद्यमावसथे स्वामिपदं निरर्गलम्।
भजताञ्च सुरापगा रतिं तव भक्तौ मयि सञ्चितस्थितौ॥ १०॥

जननी जगताञ्च मे महाविषयासङ्गतुषारभूधरे।
रुचिमाप्स्यति नूनमेव यत् पितुरोकः प्रियमेव सर्वथा॥ ११॥

निवसन् सुतशास्यसुन्दरीरतिचैत्येषु मुदाऽद्भुतेषु सः।
श्वसितोरगसंहतौ मम श्रयतां ते सुतबर्हिणो रुचिम्॥ १२॥

भगवन्निति ते निमन्त्रणं कुरुते पश्य सनातनः स्वयम्।
न विकल्प इहोपयुज्यते प्रभुताऽस्मिञ्छुतये हि दीयते॥ १३॥

अधिकं किमु वा ब्रवाण्यहं भगवन्नस्मि चतुर्दशीपरम्।
तमसोऽपि कला विधोरिव प्रियतां ते शितिकण्ठ चेद् व्रजेत्॥ १४॥

(१९६९)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मातुः स्तुतिः

मातस्त्वच्चरणारविन्दकिरणानादाय धन्यायते
पीठत्वेन सभाजितः सुरगणासेव्यः स चिन्तामणिः ।
धम्मिल्ले रचितप्रसूननिचयः कल्पद्रुमोऽसौ हवि-
र्धानी सा च पयोऽवनेजितपदा संबिभ्रतः स्वं यशः ॥ १ ॥

मातश्चित्तवितर्दिकामधिवसन्तीच्छामयूरी मम
प्रत्यग्रान् विषयाभिधान् विषधरान् सम्प्रेक्ष्य नृत्यत्यसौ ।
सूते किञ्च विचित्रपोतकगणां तत्रैव नृत्यत् स्थिरं
कोऽत्र स्यान्मृगयुर्विना तव शुभं दिव्यं कृपाविभ्रमम् ॥ २ ॥

मातर्मूर्ध्नि पतन्ति मे सरभसं चिन्तातुषारानलाः
शीता अप्यतिमेदुरा ज्वलयितुं त्वद्दत्तमेतद्वपुः ।
कश्छत्रं मयि धारयेदथ भवेत् को वा वसन्तोऽधुना
त्वत्पादांशुचयेन पीवरतनुं पीठाब्जधूलिं विना ॥ ३ ॥

मन्दे मय्यभितः पतन्त्वविरतं दौर्भाग्यमेघोपला
एतन्मे जरदन्त्वपक्वकणिशं क्षेत्रञ्च, नास्ति व्यथा ।
एतावत्तु विषायते मनसि यद्गान्धारराजात्मजा
जेत्री त्वां जननि प्रवत्सलतया दृष्टिं सुते तन्वती ॥ ४ ॥

मातर्नास्मि शुकोऽनुवादकलया धन्यो न वा पुण्ड्रको
निश्च्योतेऽप्यतिमात्रमात्मरहितो मौनैकबद्धस्पृहः ।
नास्म्येवामृतरश्मिरेव जडताक्लिष्टां सुधां धारयन्
नागोऽप्यस्मि न वा द्विजिह्वविरुदो, दीपोऽस्मि ते ज्वालितः ॥ ५ ॥

मातस्त्वद्भवने त्वदीयमधुरस्फीतस्मितिस्वच्छता-
शीतांशुप्रतिमांशुराजितरलस्वान्तोऽस्मि चन्द्रोपलः ।
ग्रन्थिस्तत्र परन्तु कश्चन दृढो राराजते नो यतः
साकल्येन भवामि हन्त गलिते हैयङ्गवीनाग्रजः ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

साहित्यं यदिदं विकीर्णविभवं सर्वत्र विभ्राजते-
ऽलङ्कारांश्च गुणांश्च कांश्चन दधन्मातस्त्वयोल्लासितम्।
एतत् किन्तु विभावमात्रमिह चेन्नो सा रसव्यञ्जना
मादृक्षे रसिके, वृथैव जननि त्वन्नाट्यलीला ततः ॥ ७ ॥

अभाग्यदिविरो दिनं दिनमिदं मदीयं शिरो
घटोत्कचयति क्षिपत्यनलमेतदाकाशकम्।
निगीर्णनिखिलातपा निजजनस्य विस्फूर्जथुं
विधौ प्रकुपिते सृजन्त्ययि दयाब्दमालायताम्॥ ८ ॥

प्रसृत्वरपुराकृतप्रबलपाक! जल्पाक! मां
विभीषयसि दारुणैः किमु तथा तथा वल्गितैः।
निबोध मयि वर्तते त्रिपुरसुन्दरीदृक्छटा-
सुधाब्धिपरिखाऽथ तत्पदपयोजमञ्जीरता ॥ ९ ॥

मया किमु कृतं पुरा किमु च साम्प्रतं चर्यते
तदक्षपटले लिखत्ववहितो यमस्याक्षिकः।
यमस्तु मयि दाडिमं क्षिपति बीजमिच्छाशुके
पदोन्नतिकृते स्तवं रचयितुं जनन्यास्तव ॥ १० ॥

जगज्जननि तावके किमु करेऽस्त्यसौ पुण्ड्रको
जगत्त्रितयपर्वभिर्विधृतपिण्डकाडम्बरः।
अहो विदितमम्बिके! त्वमसि भीषिता मादृशां
पुराकृतवराहकैर्विकटपाकदंष्ट्रोद्भटैः ॥ ११ ॥

यदध्वरजसां कणानमृतवर्षिभिस्तर्षिभि-
स्त्वदङ्घ्रितलरोचिषे म्रदयति प्रकाशैः शशी।
सुरद्रुविटपावलीशितिवितानगर्भस्थित-
प्रदीप्तकनकासना विजयतेऽम्बिकाऽसौ परा ॥ १२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुरारितपसि स्पृहां बलमलम्बुषावासिनि
म्रदिम्नि, कलनापरां स्मरतिकर्मतां तां स्मरे ।
उदित्वरविसृत्वरज्वरतिमात्रपात्रायितं
रतौ च दधती जयत्यहह सा पराम्बारुचिः ॥ १३ ॥

यदीयसमताकलालवदिदृक्षया वासवो
विरिञ्चशतवार्षिकं तप उपादिताक्ष्णां वने ।
अथापि च पुलोमजाञ्चलविमृष्टबाष्पः स्थितः
स्मरारिहृदयेश्वरी जयति साऽम्ब ते माधुरी ॥ १४ ॥

त्वदङ्घ्रिकणिकालवं स्पृशति पद्मगर्भेऽपि यः
स्थितिं व्यधित वेदभूरिति स वन्द्यते पद्मभूः ।
अहो न खलु का कथा भवति तस्य यत्र स्मितं
शशाङ्ककुमुदार्दनं तव सुधाम्बुवाहायते ॥ १५ ॥

सुरद्रुकुसुमावलीरचितशेखरा कामधुक्-
पयःकलशिकाशया कटिविलम्बिचिन्तामणिः ।
यदीयगृहदेहलीपरिचरक्रियाकामनाऽ-
पराधभयमूर्च्छिता रतिरिमां स्तुमोऽम्बां पराम् ॥ १६ ॥

(१९७८)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

के. राजन्नशास्त्री

— सायम्
(१९७३)
— बलिपुष्टविलसितम्
(१९७३)
— परपुष्टदशकम्
(१९७३)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सायम्

धरणिपस्तरुणारुणविक्रम-
स्तरणिवंशपयोनिधिचन्द्रमाः ।
विकचवारिरुहायतलोचनो
नरमणी रमणीयवपुर्मुदे ॥ १ ॥

कमलिनीवनिताः स्वपतौ रवा-
वुपगतेऽस्तमनन्यसमाश्रयाः ।
रुरुदुरुन्मदभृङ्गरवच्छलाद्
विगतवारिजवक्त्ररुचो भृशम् ॥ २ ॥

शिशुमप्यमृतांशुमुत्कटाः
सहसा शिश्रियुरभ्रमध्यगम् ।
रुचयो, नृपतिं यथाऽन्वय-
क्रमतः सम्पद आगता अहो ॥ ३ ॥

हिमदीधितिपादताडिताः[1]
सपदि त्यक्तमधुव्रतानुगाः[2] ।
विनिमीलितपुष्करेक्षणाः
कमलिन्यो निमिमीलु[3]रञ्जसा ॥ ४ ॥

कुवलयमथ मोदं प्रापयन् कौशिकं[4] तं
सततबुधहितैषी पञ्चबाणस्य मित्रम् ।

---

१. पादः = किरणः चरणश्च
२. मधुव्रतोः = भ्रमरो मद्यपायी च ।
३. निमीलनं = मुकुलनं मरणञ्च ।
४. कौशिकं = उलूकं विश्वामित्रञ्च ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्यलसदखिलऋक्षैः[५] सेव्यमानः शशाङ्को
दशमुख तिमिरान्तो[६] रामचन्द्रो यथाऽसौ ॥ ५ ॥

(१९७३)

बलिपुष्टविलसितम्

बलिपुष्ट! चिराय जीव सुस्थस्तव दाक्षिण्यत एव कार्यसिद्धिः ।
अथ तर्हि तदन्यथेष्टसिद्धौ भविताऽसि त्वमरिष्ट एव नूनम् ॥ १ ॥

ददते बलिमेव ते विदोऽमी निजकर्मप्रविलोपभीजिभाजः ।
कति सन्ति न चापरे पतन्तो बलिसापेक्ष इहाभवस्त्वमेकः ॥ २ ॥

बलिकाल उपस्थिते यदेको निजवर्गं नु समीरयत्यजस्रम् ।
'परभृत्'-तत एव गीयसे त्वं ननु भो नान्यकुलस्य पोषणाद्धि ॥ ३ ॥

विषमं हि समीक्षसे समस्तं सततं कामयसेऽप्यरिष्टमेव ।
अथ कार्ष्ण्यमुरीकरोषि रूपे चिरजीवी त्वमतोऽन्यथा कथं स्याः ॥ ४ ॥

नहि मानयसि द्विजान् मुखेन श्रुतिवैरुद्ध्यमुरीकरोषि शब्दे ।
सततोदरपूर्तिमात्रकामः परवृद्धिं बत रे कथं सहेथाः ॥ ५ ॥

पुरतो मम 'का' 'क' एवमन्यान् प्रति जल्पन् मुखमुन्नयस्यजस्रम् ।
न तु पश्यसि दुर्मदावलिप्तो निजसंस्थानमशेषलोकगर्ह्यम् ॥ ६ ॥

विषमेक्षण एव यत् स्फुटं त्वं ननु योग्यः पितृकानने विहर्तुम् ।
भियमेषि निशाटनेभ्य एवं ह्यपि कृष्णोऽसि विचित्रमेतदद्धा ॥ ७ ॥

अभिकामयसेऽप्यजस्रमस्तं परिहृष्यन् प्रहरन् क्षते परेषाम् ।
निजकुक्षिपरायणाः कथं वा परदुःखं गणयन्ति खेचरास्ते ॥ ८ ॥

---

५. ऋक्षैः नक्षत्रैः भल्लूकैश्च ।
६. दशमुख तिमिरान्तः = सर्वतोमुखतिमिरान्तकः तिमिरसदृशदशमुखान्तकश्च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

समुच्चतरमेयिवान् पदमनन्यलभ्यं पिक
त्वमेव यदि मूकतां सहचरेष्वमीष्वाश्रयेः ।
कथं जनसमादरः कथमुत प्रजारञ्जनं
कथं त्वयि शुचौ मतिः कथय सर्वसंस्तव्यवाक् ॥ ९ ॥

(१९७३)

परपुष्टदशकम्

पञ्चमरागं तनुते परपुष्ट! भवांस्तनोतु किमु तत्र ।
अथ सर्वसम्मतत्वे न भवान्न वयं हि हेतुतां यामः ॥ १ ॥

कालः खल्वनुकूलोऽप्यसाध्यमर्थं सुसाध्यतां नयते ।
तत्र कदाचिद्विदुषा न वा स्मयो नापि विस्मयः कार्यः ॥ २ ॥

किं मतिपथं न जुषते षड्जसमादरण कौतुकी जातु ।
सर्वोऽपि भवति लोकः पञ्चमसञ्ज्ञातहेयभावोऽसौ ॥ ३ ॥

किञ्चित् कलयत्वं हृदि, भविता कोऽहं गतेऽथ कालेऽस्मिन् ।
तव नाम जानते नो येषां त्वं जातु सम्मतस्तेऽपि ॥ ४ ॥

न हि खेदमत्र कुर्या अविनीतः कः सुखं चिरं लभते ।
यत्त्वं यैः परिपोष्य प्रभुतां गमितस्तमेव धिक्कुरुषे ॥ ५ ॥

नापेक्षसे च जातिं न वा स्वधर्मं नापि भूतार्थम् ।
कालात् प्रभवामीत्यपि नहि जानीषेऽतिदुर्मदाविष्टः ॥ ६ ॥

किं तेऽविनीतभावं ब्रूमः परपुष्ट! यद्रसालस्य ।
नित्यं प्रसवं ग्रससे फलसाधनतां त्वविगणयन्नेव ॥ ७ ॥

अत्यर्थाशापूर्णो मौनं भजसे यदुच्चपदमेत्य ।
मार्गश्रान्तैर्मनुजैः फलाप्तिकामैर्विहन्यसे जातु ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रमदाः समदाः कुरुषे द्विजानथात्येषि पञ्चमाभिरतः ।
न हि ते वर्णपरीक्षा किं मलिनः स्वस्य दूषणं वेत्ति ॥ ९ ॥

(१९७३)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जगन्नाथपाठकः

— मेघमाला
(१९६८)

— किञ्चिद् विकीर्णमुच्छ्वसितम्
(१९७२)

— धीराःक्षणम्
(१९७८)

— कापिशायनी
(१९७८)

— गझलगीतम् (१)
(१९८०)

— गझलगीतम् (२)
(१९८०)

— रुबाईगीतानि
(१९८०)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मेघमाला

संव्याकीर्णं धनपरिमिलद्गाढतास्त्रभारं
सद्यःस्नातं हिमकरमुखे लोललोलं ललन्तम्।
श्यामश्यामं विलसतिनभश्चुम्बितं मत्तमत्तं
बिभ्राणेयं कचपरिचितश्रीभरं मेघमाला ॥ १ ॥

यातो ग्रीष्मः शममिह महाकालसङ्गस्त्विदानीं
प्राप्ता प्रावृट् परिणतमनस्तापहर्त्री तथाऽपि।
निर्गच्छेत् सा मम नयनतो वा न वा वारिभूता
स्मृत्याख्ये या नभसि सघनोद्भिद्यते मेघमाला ॥ २ ॥

नृत्याभ्यासे प्रगुणितमुदां बर्हिणां पाठशाला
सन्तप्तानां हृदयनयनोन्मादिनी काऽपि हाला।
सङ्गीताढ्या कचभरचिता काऽपि चण्डालबाला
श्यामश्यामा विलसति नभःप्राङ्गणे मेघमाला ॥ ३ ॥

(१९६८)

किञ्चिद् विकीर्णमुच्छ्वसितम्

त्वं काचिन्नभसि प्रभातसमये स्निग्धस्मितार्द्रा प्रभा
पूर्वस्यामरुणारुणेव किमपि द्रागुत्थितोन्मीलसि।
एको भग्नमनोरथोऽश्रुसरसीस्नानार्द्रपक्षश्लथः
क्लिश्याम्येष कुलायकष्टकुहरे लीनो निमीलन्नहम्॥ १ ॥

केचिन्मानसमुद्धता निरगमंस्त्वद्दत्तमाल्याङ्किता-
स्त्वन्निर्देशचमत्कृताः कतिपये सम्प्राविशन् सम्भ्रमात्।
पाणौ शुष्यदशेषपुष्पशिथिलस्त्वद्दर्शनैकाशया
स्थानं हन्त न लब्धवानहमिह त्वन्मन्दिरद्वार्यपि ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कस्मै हन्त वदेयमद्य निखिलं चित्तस्थमेतावता
पीडाग्निक्वथितं कषायमधुरं स्नेहेन किञ्चित्कटु ।
तूष्णीम्भावमतो गृहाण मुखरे मद्वाणि हृत्कोटरे
श्रोतव्यं ननु यस्य, नैव स जनः श्रोतुं समुत्कण्ठते ॥ ३ ॥

धूमोद्गारमवाप्य दृष्टिविरसं चिन्ताश्मशानस्थलाज्
ज्योतिर्दीपगणादवाप्य निहितात् काङ्क्षासमाधावथ ।
दौर्भाग्यानिलनेत्रवारिमिलितं सान्द्रासु सन्ध्यास्वदो
नो जाने क्वचिदन्तरन्तरतमे यत्किञ्चिदुज्जृम्भते ॥ ४ ॥

सम्पूर्णाय न देव काचिदुदिता क्षुद्रे मदन्तस्तमे
त्वत्कारुण्यसुधामहाजलधये तीव्रातितीव्रा तृषा ।।
एतस्याः प्रशमाय केवलमलं तस्माद्विकीर्णं पृषत्
चेन्नो दास्यसि तत्कथं विरमतामेष प्रतीक्षाग्रहः ॥ ५ ॥

नाहं त्वत्करनिर्गतान् सुखकणान् भोक्तुं समग्रान् क्षमो
नो वा दुःखकणांस्तथा क्षणमपि स्वीकर्तुमेवोत्सहे ।
दुःखं वापि सुखं न यत्र सहजं त्वद्दृष्टिपातोल्लसत्
त्वत्कारुण्यमिहैकमेव तृषितो यत्किञ्चिदभ्यर्थये ॥ ६ ॥

द्वारि द्वारि गतो गवेषितुमपि त्वां नो लभे कुत्रचित्
प्राप्तस्त्वं तु सदा निलीन इव मच्चेतोगृहाभ्यन्तरे ।
यच्छुष्कं परितप्तमर्थरहितं सङ्कीर्णमासीत् पुरा
तत्पूर्णं विचलत्तरङ्गमधुना विस्तारि मे भासते ॥ ७ ॥

मत्स्पर्शाद्विकृतिं भजेत विगलेद्वा मत्कराग्रादियं
स्याद्वा त्वन्मनसोऽनुकूलमपि नो मत्कृत्यमित्यन्ततः ।
त्वल्लावण्यनिरीक्षणप्रचलितान्तर्वृत्तिरप्यन्यथा
नो शक्नोम्युपवर्तुमेष बत मे भीत्येव वक्त्रावृतिम् ॥ ८ ॥

(१९७२)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धीराः क्षणम्

स्रग्दामाङ्कितमस्तकः पथि पदं धत्ते शनैः रासभः
काकश्चाम्रफलं पचेलिममहो निर्मक्षिकं खादति।
दृप्तः श्वा करलालितश्च युवतेरङ्के निमीलत्यलं
द्रष्टुं ये क्षमतां भजन्ति ननु ते पश्यन्तु धीराः क्षणम्॥ १॥

सञ्जातो बत चन्दनेन कलहो यत् कर्दमस्याधुना
भेकः कश्चिदितो विवेकनिपुणो मध्यस्थतां प्राप्तवान्।
ब्रूते पङ्कनिमग्न एष लभते साम्यं न तच्चन्दनं
साकं किञ्चन कर्दमेन तदिदं शृण्वन्तु धीराः क्षणम्॥ २॥

(१९७८)

कापिशायनी

कुसुमेन शिरो ह्यलङ्कृतं तदिदं नाम महन्महत् सुखम्।
निरलङ्करणां परं लतामवलोक्यापि मनोऽवसीदति॥ १॥

तव वा मम वास्ति जीवने नहि काचित् परमार्थतो भिदा।
अयि रूपिणि! रूपमेव ते कुरुते दर्शकदृश्यभावनाम्॥ २॥

जलमध्यगता महोर्मयो मम नावं तटभूमिमानयन्।
तटभूमिगता लघूर्मयो मम नावं शनकैर्न्यमज्जयन्॥ ३॥

गगनं मधुवेश्म किं शशी मधुकुम्भः किमयं समुद्गतः।
उडवः किमिमे च पायिनो निपतन्तः क्वचिदुत्थिताः क्वचित्॥ ४॥

परिशीलनयाऽपि यत्नतो न जनः कोऽप्यमिलन्मधुव्रतः।
यदि सन्त्यपरे पिपासवो न विदन्त्येव नु तेऽक्षिभाषितम्॥ ५॥

अमृताय कियन्नु काङ्क्षितं यदि पूर्णं मधु काचिदर्पयेत्।
अमृतं मधुरं हि केवलं मधुरोन्मादकलक्षणं मधु॥ ६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शिथिलेषु मधुप्रदानतो मधुयोषिज्जनपाणिषु क्षणम्।
चषकः स्थिरभावमागतो मम रिक्तोऽपि बभूव पूरितः ॥ ७ ॥

चषका इह जीवने मया परिपीता अपि चूर्णिता अपि।
मदमेष बिभर्मि केवलं क्षणपीतस्य मधुस्मितस्य ते ॥ ८ ॥

विषमासु कुतोऽपि लभ्यते न शमः सम्प्रति भाग्यवृत्तिषु।
तव धार्मिकमन्दिरेषु वा मधुशालासु च वा तव प्रिये ॥ ९ ॥

(१९७८)

गझलगीतम् (१)

त्वं मदन्तिके येषु ते हि नो गता दिवसाः
किं प्रतीक्षया तेषां ते हि नो गता दिवसाः ॥ १ ॥

किं वसन्त आगन्ता किं कुहूरवो भविता
प्रियजने विदूरस्थे ते हि नो गता दिवसाः ॥ २ ॥

प्रीतयः श्रयन्ते नो कमपि बहिरुपाधिमिति
त्वद्वचः श्रुतं येषु ते हि नो गता दिवसाः ॥ ३ ॥

श्वसिम इत्यहो किं रे जीवनं विनाऽपि त्वां
जीवनञ्च येष्वासीत् ते हि नो गता दिवसाः ॥ ४ ॥

त्वद्वचः श्रुतं सुखदं त्वन्मधुस्मितं पीतं
ये च तेऽन्तिके नीतास्ते हि नो गता दिवसाः ॥ ५ ॥

त्वं यदाऽऽगता प्रातः त्वं यदा गता सायं
मत्कृते नु येष्वासीत् ते हि नो गता दिवसाः ॥ ६ ॥

मौनमेव धारय रे को हि नो वचः शृणुयात्
येषु नः श्रुतं वचनं त हि नो गता दिवसाः ॥ ७ ॥

(१९८०)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गझलगीतम् (२)

छिन्नो हि मूलतः प्रणयः किं प्ररोहति
सेको विधीयतामपि चेत् किं प्ररोहति ॥ १ ॥

तन्त्री हृदः कदाचिदियं भग्नतां गता
कोऽपि स्वरस्ततो वद रे किं प्ररोहति ॥ २ ॥

हृदयस्थली मरुत्वमुपेता विधेर्वशात्
स्नेहाङ्कुरः कदापि ततः किं प्ररोहति ॥ ३ ॥

पङ्गुर्ममेयमाकाङ्क्षा त्वां गिरिस्थिताम्
उपलब्धुमन्ततः शिथिला किं प्ररोहति ॥ ४ ॥

जन्मान्तरस्य सौहृदमथवा भवेन्न वा
रम्यं निरीक्ष्य वस्तु न ततः किं प्ररोहति ॥ ५ ॥

मृत्योः प्रतिक्षणं यदि जागर्ति भावना
आशा हि जीवनस्य ततः किं प्ररोहति ॥ ६ ॥

आधारवृक्ष एष न विनिपात्यतां विधे
लतिका सुकोमला तमृते किं प्ररोहति ॥ ७ ॥

बुद्धेः प्रभाव एष वरीवर्ति सर्वतः
हृदयस्य किं प्रभाव इत किं प्ररोहति ॥ ८ ॥

(१९८०)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रुबाईगीतानि

सन्मित्र कथं नाम वर्तसे दूरे
त्यक्त्वा तटमायाहि तटिन्याः पूरे।
व्यर्थस्तवैष आत्मरक्षणोपायो
गणितो भवेस्त्वमद्य पण्डिते शूरे॥ १॥

सौदामनि मेघेषु दृश्यसे स्फुरिता
नित्यं स्फुर रे लोकस्य भवाभिमता।
सम्प्रार्थयेऽस्य पक्षिशावकस्य तथा
चेष्टस्व समं यातु चित्तचञ्चलता॥ २॥

सहसा न तथा व्योम्नि घना गर्जन्ति
वृक्षा न लता हन्त वृथा तर्जन्ति।
सौदामनि नैव परिस्फुरेः सततं
नीडेषु शयाना हि खगा मूर्च्छन्ति॥ ३॥

(१९८०)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रामकरणशर्मा

— न वेद्मि तावत् किमहं प्रतीक्षे
(१९६१)

— अमूर्त्तं किमप्यस्ति मित्रं मदीयम्
(१९७०)

— कविर्बुभूषामि
(१९६१)

— जिज्ञासा मे जायतां नावबोधः
(१९७०)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न वेद्मि तावत् किमहं प्रतीक्षे

यथा यथाप्नोमि सुखं चिरायुर्बलं पदं स्वर्णमभिज्ञतां वा।
तथा तथैवन्त इमाः पिपासा न वेद्मि तावत् किमहं प्रतीक्षे ॥ १ ॥

करद्वयञ्चापि पदद्वयञ्च मनो महच्चैव निजं दधानः।
इतस्ततो व्यर्थमहं चरामि चाञ्चल्यचञ्चूरितचित्तवृतिः ॥ २ ॥

'इदं कृतं तच्च पुनः करिष्ये जितस्त्वयं तच्च पुनर्विजेष्ये'।
नखैश्च दद्भिश्च शरैश्च वज्रैश्छलैश्च युध्ये परमाणुभिश्च ॥ ३ ॥

लिप्सुर्जगत् कृत्स्नमहं बलेन जगन्न मां वाञ्छति लेशतोऽपि।
स्वकीयघातैर्विचरामि तुष्यन् वेद्मि तावत् किमहं प्रतीक्षे ॥ ४ ॥

अयं रसालः सुतरां स्वसंस्थः स्वकीयपत्रैः परिवर्धमानः।
सदा समाधिं भजते सगीतं न कुत्रचिद्धावति दूयते वा ॥ ५ ॥

स्वयं वसन्तस्तमुपैति काले स्वयं समीरः समुपास्त एनम्।
स्वयं सितांशुः सितसूत्रजालैर्महाम्बरं तस्य विनिर्मिमीते ॥ ६ ॥

स्वयंव्रतोऽयं स्वयमेव लब्ध्वा फलान्यमूनि त्वरितं विसृज्य।
सुखं शयानः परिशोभतेऽत्र न वेद्मि तावत् किमहं प्रतीक्षे ॥ ७ ॥

अयं पुनस्तालतरुः पुरस्तादुदारतामण्डित ऊर्ध्वगामी।
मधु स्वकीयं विसृजन्नजस्त्रं महाध्वनिर्व्योमनि खेलतीह ॥ ८ ॥

स्वचामरच्छत्रनिषेव्यमाणः कदाप्यहो रागमयं न याति।
दुष्कण्टदण्डैरतुदंश्च कश्चिन्महत्तया रक्षति नैजराज्यम् ॥ ९ ॥

जयत्ययं यद्यपि नो जिगीषा फलत्ययं यद्यपि नाभिलाषः।
विवर्धते यद्यपि नोन्निनीषा, महाधनो यद्यपि नैव लुण्ठा ॥ १० ॥

बृहत्तमो यद्यपि वक्रता नो महाबलो यद्यपि नाभिसन्धिः
सुसंहतो जीवति दीर्घमेष सुविस्तृता यद्यपि नैव शाखाः ॥ ११ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुत्रः पृथिव्या अयमेष शान्तः प्रेयानृजुः प्रांशुरहीनगात्रः ।
महाँस्तितिक्षुर्जयतीह मौनी न वेद्मि तावत् किमहं प्रतीक्षे ॥ १२ ॥

इयं सरिन्निर्मलवारिधाराप्रवाहिणी निर्मलरम्यतीरा ।
परःसहस्राणि निजार्जितानि प्रमोदकल्लोलकलानि धत्ते ॥ १३ ॥

न याचते कञ्चिदपीयमन्यं झरोदिता सागरमात्रलक्ष्या ।
पुष्णाति सर्वान् शरणार्थिनोऽपि स्वयंकृतैर्नीरभरैर्नितान्तम् ॥ १४ ॥

स्वयंवहा नीरधिलीयमानाऽप्यहर्दिवं वृद्धिमतीयमास्ते ।
न कापि चिन्ता न च कोऽपि शोको न वद्मि तावत् किमहं प्रतीक्षे ॥ १५ ॥

(१९६१)

अमूर्त्तं किमप्यस्ति मित्रं मदीयम्

न जानेऽस्य नामापि कर्मापि नैव
न जाने गुणानस्य नापि स्वरूपम् ।
परं प्रत्ययो वर्त्तते मे द्रढीयान्
अमूर्त्तं किमप्यस्ति मित्रं मदीयम् ॥

इदं नेत्रयुग्मं सदा मां नियुङ्क्ते
सरूपेषु रम्येषु दृश्येषु तेषु ।
अदृष्ट्वा सजातीयतां किन्तु चित्तं
ततस्तूर्णमेवाप याति क्वचिन्मे ॥

सरूपाणि रम्याणि दृश्यानि तावन्
मनो मे जिहीर्षन्ति नूनं कदाचित् ।
कथं मानसं गोपनीयं परं स्वं
स्वयं हारयेयं परैर्दुर्विदग्धैः ॥

रिरंसाम्यहं कुत्रचिन्नत्यमेव
न यन्मां जिहासेन्न वा मे जिहमा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्वचिन्नाधिगच्छामि रम्यं जगत्यां
तथाभूतमानन्दसन्दोहदोहम् ॥

अनेका जगत्यां विसर्पन्ति यूका
जिघृक्षन्ति रक्तं पिपासा ह्यनन्ताः ।
क्व यायां कुतः किञ्चिदीदृग् लभेय
यदालोक्य सर्वं स्वकीयं ददानि ॥

यतो यामि तत्रैव मूर्त्तैर्मनो मे-
ऽमलं नित्यमाहन्यतेऽमूर्त्तमेतत् ।
न चेदेतदाहन्ति कश्चित् कदाचित्
कथं कश्चिदाहन्ति गुप्तं मनो मे ॥

स्वयं गौरवं निर्वहामि स्वकं हि
वहाम्यन्यदीयं गुरुत्वं समानम् ।
कथं तर्हि निःश्वासवातो लघीयान्
अपि क्षम्यते नैव मूर्त्तैः परैर्मे ॥

समेषां कृते भिक्षमाणः सुधां स्वः
स्वयं कालकूटं पिबन्नेव वर्त्ते ।
कथं प्रक्षिपन्त्येव ते भोगिबाणान्
मयि प्राज्यरोषा, न जाने तथाऽपि ॥

स्वयं क्लेशवृत्तिः परानातपेभ्यः
सदा त्रातुमभ्युद्यतो निर्विकारः ।
कथं किन्तु रुष्टा इमे बान्धवा मे
यतन्ते पुनर्दग्धुमेवातपत्रम् ॥

अकूपार एषोऽहमस्मि प्रशान्तो
न यो भिक्षते किञ्चिदप्यत्र कश्चित् ।
न वेलामतिक्रम्य कुत्रापि याति
परान् सेवितुं बाधितुं वाऽपि हन्तुम् ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तथाऽप्येष वाञ्छामि, रत्नैर्मदीयै-
रलङ्कारमैत्रीं समे निर्विशेयुः।
न जाने कथं, किन्तु, रत्नेभ्य एव
प्रभूतं तमः सृज्यते सर्वतोऽपि॥

न दूये परार्थं न वा स्वार्थमेव
न दूये, कथं भावना आहता मे।
सदा बाधते मां पुनः क्लेश एकः
कथं विक्रियां बन्धुषूत्पादयामि॥

अतः सम्यगालोच्य सत्यं ब्रवीमि
न मूर्त्तेषु रागः क्वचित् स्थापनीयः।
स्वयंसिद्धमेतत् समानं समेषा-
ममूर्त्तं किमप्यस्ति मित्रं मदीयम्॥

(१९७०)

कविर्बुभूषामि

कविर्बुभूषामि न किन्तु भावाः
स्पृशन्ति भव्या हृदयं मदीयम्।
न चेद् घनो वर्षति, किं करोतु
दीर्घाहदग्धस्तृषितस्तटाकः॥

जयत्यहो सर्गकृतो विकारः
स्थूलोऽसमः, क्व प्रचलेन्निसर्गः।
नो चेत् क्वचित् स्यादवकाशभावः
कथं चलेत् पुष्पमयं विमानम्॥

महासमुद्रस्य तटे निषण्णा
पुनः पुना रोदिति काश्यपीयम्।
"पृथक्कृताऽहं प्रथनप्रियत्वात्
कठोरकाया मृदुजीवनेभ्यः॥"

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सहैव बुद्धिर्व्यथिता मदीया
बद्धा पुनः पार्थिवतन्तुजालैः ।
''भावं'' परित्यज्य पदा''न्यभाव-''
स्थलेषु धत्ते विचिकित्सितानि ॥

ब्रवीतु किं वाग् , यदि नास्ति भावो
गीतं कथं गायतु, चेन्न हर्षः ।
नो चेन्मषी नापि च भूर्जपत्रं
कथं लिखेत् किञ्चन लेखनीयम् ॥

न वेद्मि शेते क्व नु जीवनं मे
तथापि जीवामि विचित्रमेतत् ।
वृषौ गतौ क्वाप्यथवा शयाते
नयेन्नरः किं शकटं सभारम् ॥

स्यां वा न वाऽहं कविभाववाही
तथापि जीयाच्चिरमेष भावः ।
नो चेत् पृथिव्यां, गगनावकाशे
रोहन्तु पुष्यन्तु फलन्तु भावाः ॥

(१९६१)

जिज्ञासा मे जायतां नावबोधः

छायां स्वीयां लब्धुकामः प्रकामं
धावं धावं क्षुत्पिपासाकुलोऽस्मि ।
दृश्याऽपीयं लभ्यते नैव जातु
ह्रीणो दूनः कान्दिशीको भ्रमामि ॥ १ ॥

बुद्धिः शास्ति- ''च्छायया कोऽस्ति लाभ-
स्तामुज्झित्वा स्वस्य लाभे यतस्व'' ।
किन्तु च्छाया सर्वदा सङ्गिनी मे
नायात्यङ्के नापि दूरं प्रयाति ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भ्रामं भ्रामं धन्वनि त्यक्तधैर्यः
पांशूनुष्णान् भास्वरान् भिक्षमाणः ।
तामाश्वत्थीं शीतलां वीक्ष्य गुर्वीं
छायां सद्यस्तत्र गत्वा न्यषीदम् ॥ ३ ॥

तच्छायायां दृश्यते नो मदीया
छाया लघ्वी, नात्र तृष्णा बुभुक्षे ।
मन्दं मन्दं वाति हृद्ये समीरे
क्लान्तिः कृत्स्ना तत्क्षणादुत्ससार ॥ ४ ॥

(१९७०)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राजेन्द्रमिश्रः

— मुषितस्तथापि वरानने!
(१९७७)
— आलोचयन्ति येऽपरम्
(१९७८)
— वाचिकं ददे कस्मै
(१९७९)
— को नु भणतु महिमानम्?
(१९८०)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मुषितस्तथापि वरानने!

सकृदेव यद्यपि लक्षितं
मुषितस्तथापि वरानने।
सलिलम्मया परिरक्षितं तृषितस्तथापि वरानने ॥ १ ॥

घनसार चम्पकचन्दनं
सुरतरुपुरन्दरनन्दनम्।
किमहो मया न वशीकृतं छलितस्तथापि वरानने ॥ २ ॥

सुखदा न पर्वनिशीथिनी
कैरवकदम्बकदीपनी।
प्रतितारकं नु शशीकृतं ग्लपितस्तथापि वरानने ॥ ३ ॥

वाते वहति ननु शीतले
आह्लादिते जगतीतले।
तव कायसौरभमाहतं क्षपितस्तथापि वरानने ॥ ४ ॥

श्रुतिसुखदरोदरगुञ्जनं
सुरपञ्चमैः पिककूजनम्।
मृदु शिञ्जितं दयितीकृतं भ्रमितस्तथापि वरानने ॥ ५ ॥

क्व नु याचते मम याचना?
क्व नु वन्दते मम वन्दना?
विनिवेदनं सततं कृतं क्षुधितस्तथापि वरानने ॥ ६ ॥

त्वयि कल्पितं विबुधार्चनं
सौभाग्यमपि मणिकाञ्चनम्।
त्वय्युपचितिर्विनिवेशिता वलितस्तथापि वरानने ॥ ७ ॥

शशिनं विहाय सुखं न ते
कुमुदिनि! वदामि हिताय ते।
तुहिनीकृतो विरहानलो ज्वलितस्तथापि वरानने ॥ ८ ॥
(१९७७)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आलोचयन्ति येऽपरम्

आलोचयन्ति येऽपरं पश्यन्तु ते स्वयम्।
संशोधयन्ति येऽपरं शुध्यन्तु ते स्वयम्॥ १॥

अन्यस्य दोषदर्शने व्यर्थं प्रयत्यते।
निन्दन्ति येऽपरं सदा निन्दन्तु ते स्वयम्॥ २॥

आकाशथूत्कृतैर्न किं हानिर्निजा भवेत्।
संक्षोभयन्ति येऽपरं क्षुभ्यन्तु ते स्वयम्॥ ३॥

गन्धं ग्रहीतुमिष्यते यैरेव पाणिना।
विज्ञापयन्ति येऽपरं जानन्तु ते स्वयम्॥ ४॥

वेदानधीत्य सर्वतः षड्दर्शनानि च।
सम्बोधयन्ति येऽपरं बुध्यन्तु ते स्वयम्॥ ५॥

आरोप्यतेऽधिबालुकं यैरत्र भित्तिका।
संस्थापयन्ति येऽपरं तिष्ठन्तु ते स्वयम्॥ ६॥

प्रज्ञा पथिप्रदर्शिका जाता न, किं तया।
विद्रोहयन्ति येऽपरं द्रुह्यन्तु ते स्वयम्॥ ७॥

विद्यामवाप्य यैरहो विनयो न रक्षितः।
सन्तापयन्ति येऽपरं ताम्यन्तु ते स्वयम्॥ ८॥

(१९७८)

वाचिकं ददे कस्मै

शृणोति कोऽपि न मे वाचिकं ददे कस्मै।
वृणोति कोऽपि न मे वाचिकं ददे कस्मै॥ १॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्यथाकथेयमहो मामकी पुरावृत्ता।
अनिर्व्यथे हि भवे वाचिकं दधे कस्मै॥ २॥

विनम्रसौम्यघनैर्भो न किं ममापकृतम्।
कदर्थितेऽत्र मरौ वाचिकं सुवे कस्मै॥ ३॥

विरोपितोऽपि न शं याति हा व्रणो भीष्मः।
अवैद्यके हि पुरे वाचिकं स्तुवे कस्मै॥ ४॥

अये ममाम्रतरौ दृश्यते नु निम्बफलम्।
स्वभाग्यचक्रमिदं वाचिकं लभे कस्मै॥ ५॥

अयाचितं न विधात्रा समर्पितं किं किम्।
अयाचकेऽर्थिजने वाचिकं वृणे कस्मै॥ ६॥

पिकोऽधुना स विलीनोऽभिराजराजेन्द्रः।
अशारदोपवने वाचिकं सहे कस्मै॥ ७॥

(१९७९)

को नु भणतु महिमानम्?

महामाये! को नु भणतु महिमानम्।
अभयं वितरसि करकमलाभ्यां नयनाभ्यां वरदानम्॥ १॥

वदनं शशी दृशौ मार्तण्डः।
दिग्वलयं परिधानम्॥ २॥

क्रोधोऽग्निः स्मितमपि नवकुसुमम्।
करुणा खगकुलगानम्॥ ३॥

पदजलमुदधिरासनं धरणी।
गगनं नीलवितानम्॥ ४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विन्ध्यगिरौ मैहरशिखरे वा ।
काञ्च्यां वससि समानम् ॥ ५ ॥

त्वमसि जननि! धनजनसुखदात्री ।
निखिलसमृद्धिनिधानम् ॥ ६ ॥

विनतजनानां हरसि विपत्तिम् ।
दृप्तानामभिमानम् ॥ ७ ॥

यमपि निजीकुरुषे करुणामयि ।
तं विदधासि वदान्यम् ॥ ८ ॥

जीवय पोषय हासय वर्धय ।
प्रेरय काव्यललामम् ॥ ८ ॥

(१९८०)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रसिकविहारीजोशी

— करुणाकटाक्षलहरी
(१९७८)
— भक्तिः
(१९७८)
— कामः
(१९७८)
— निर्वेदः
(१९७८)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

करुणाकटाक्षलहरी

राधे! ते करुणाकटाक्षलहरी नीलाम्बुजस्पर्धिनी
कालिन्दी प्रतिभाति काऽपि विमला सम्पत्सुधावर्षणे ।
किं वा मौक्तिककान्तिपुञ्जजयिनी सारस्वतेयी च्छटा
किं वा कैरविणीरुचां मदरिपुर्भागीरथीसन्ततिः ॥ १ ॥

राधे! ते महिमा गिरामविषयो यो वेदवाक्यात्मनां
सोऽयं मादृगतीवमन्दधिषणस्योक्तेः पदं स्यात् कथम् ।
योऽयं प्राशितुमौर्ववह्निभिरशक्योऽपामपारो निधिः
क्षुद्राऽपि प्रभवेदमुं चुलकितुं तेऽपाङ्गपात्रायिता ॥ २ ॥

कश्चिद्विश्वजिदादियज्ञविधिना पाकारिमासेवतां ·
कश्चिच्छत्रुविनाशनैकमतिना सैंहं वपुः सेवताम् ।
केचिन्मोक्षधिया सुरासुरपतिं योगेश्वरं शङ्करं
सेवन्तां वयमप्रमेयवरदां सेवामहे राधिकाम् ॥ ३ ॥

इष्टानिष्टविवेकबुद्धिरहितं दुष्कीर्तिमन्तर्जडं
तालाङ्कावरजप्रिये! तव कविं निन्द्यात् पथो रक्षताम् ।
आलोक्यान्धुमुखे पतन्तमपि का पुत्रं न संरक्षयेन्
माता मातृगतो निसर्गसुलभो वात्सल्यपूर्णो रसः ॥ ४ ॥

दुर्मात्राः पवनाशना इव मनः संतापयन्ति ध्रुवं
कामक्रोधमदादिषड्रिपुगणः संबाधते नित्यशः ।
न त्रातुं प्रभवन्ति मां धनसुतस्त्रीबन्धुमित्रादयो
नूनं मद्विधदीनरक्षणविधौ राधे! त्वमेका गतिः ॥ ५ ॥

राधे! शास्त्रनिषिद्धकृत्यमवशस्त्यक्तुं न शक्नोम्यहं
साध्यं कर्म घुणाक्षरादपि नयान्नो कर्तुमस्मि प्रभुः ।
कृत्याकृत्यविधानहानविमुखस्यागःसमुद्रस्य मे
गन्तुं नौरिव ते क्षमैव शरणं पारं भवाब्धेः परम् ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धर्माणां निचयास्तपोधनवराचारैः सुविज्ञापिताः
श्रुत्युक्ताः स्मृतिभिः समाहिततरा नाघ्राणमार्गं गताः ।
सोऽहं केन पथा तरेयमवरं घोरं महागा इति
स्मृत्वा त्वां भवभीतिभञ्जनपरां राधे! त्यजेयं भयम् ॥ ७ ॥

कदाचिल्लिप्साभिर्दृढतरसमुद्रिक्तकुहना-
पिशाचीयातुभ्यः कथमतितरेयं यमसदः ।
इति स्मृत्वा भीतो विषमभवसिन्धोरभयदां
स्तुतां तां गीर्वाणैः शरणमगतिः कामपि वृणे ॥ ८ ॥

तीक्ष्णा सा बडिशी तवास्ति नयनं मीनाननच्छेदने
राधे! कामशरानुविद्धहृदयो मत्स्यो यथा बध्यते ।
श्रीकृष्णस्य मनोझषः स्मरजलस्पन्दी यथाऽऽकृष्यते
तद्वन्मे स्मरतन्त्रचित्तशफरः शीघ्रं तयाऽऽकृष्यताम् ॥ ९ ॥

राधे! ते नयने विषेण च सुधापूरैश्च पूर्णे, यतः
श्रीकृष्णोऽप्युपयाति मोहमथ च प्राप्नोत्यनल्पं फलम् ।
एषोऽहं च तथैव मूर्च्छनपरः प्रह्लादधामा च तं
कञ्चित् सिन्धुमुपैमि यं श्रितवतां नास्त्येव जन्मान्तरम् ॥ १० ॥
(१९७८)

भक्तिः

कलिन्दतनयातटे प्रभुनिषेवणानन्दनो
न्युवास बहुवत्सरान् धृतपटच्चरोऽकिञ्चनः ।
स्तवीति भवमोचकं स्तवमतिप्रगे नित्यश-
स्तमिस्रपरिपन्थिनं धमनिसन्ततः सौभरिः ॥ १ ॥

मुकुन्दः श्रीकृष्णः सकलजगदुद्धारणचणः
कृपापाङ्गं पूजां विदधति विचाकर्तु मयि सः ।
पटुत्वं मे वाण्यां निरुपधि वितास्तर्तु निपुणं
धुनीतां मे ध्वान्तं ध्रुवमभिपनीपत्तु जडताम् ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वन्देऽहं सततं पदाब्जयुगलं माणिक्यरत्नोज्ज्वलं
दाध्यायेत गुणान् मनः प्रमुदिता प्रज्ञा प्रचाकाश्यताम् ।
शास्त्रज्ञानकृपीटयोनिसुभगा सेषेव्यतां सन्मति-
र्बोबुध्येत विशुद्धतत्त्वमखिलं वाव्रज्यतां संशयः ॥ ३ ॥

वन्देऽहं मन्त्रमूर्तिं प्रणतहृदयगो यस्तमो दन्दहीता-
च्छ्रद्धां मे तन्तनीताद्रसिकहृदयगो देदवीतात् स्वधाम्रा ।
तं कृष्णं तोष्टवीमो मधुरगुणमयीं मालिकां जाग्रथीमः
पूजार्थं नन्नमीमो हृदयनिधिहतं माधवं पोपुवीमः ॥ ४ ॥

तन्नम्यन्ते चरणकमलं भावगम्यं विपन्ना
दाध्यायन्ते मधुरमधुरां नित्यलीलां प्रपन्नाः ।
योयुज्यन्ते तव पदरजो योगिनः सिद्धिसिक्ताः
पाप्रथ्यन्ते यदि रसगुणा गीयमाना मुरारेः ॥ ५ ॥

दादध्यन्ते हरिपदनते सम्पदो निःसमाना
देदीयन्ते धवलधवलं सद्यशो दिग्दिगन्तम् ।
दादद्यन्ते सरसकवितावैदुषीमद्वितीयां
पापत्यन्ते यदि मयि कृपापाङ्गपाताः कटाक्षाः ॥ ६ ॥

या दिव्या प्रविजर्हरीति कृतिनां चेतःसु यस्याः प्रभा
पास्पर्धीति शशाङ्ककुन्दसुषमास्तौमैरतुल्यप्रभैः ।
नेत्रापाङ्गनिपातनैः समनुर्नीति स्वयं माधवः
सा राधा कृपया प्रसन्नहृदया राराध्यतां सम्पदम् ॥ ७ ॥

रागो मे जङ्गमीतान्ननु भजनविधौ निर्विकल्पे समाधौ
कामो जाहातु वृत्तिं न च विषयविषे मन्मनो बम्भ्रमीतात् ।
प्रज्ञा रंरन्तु शास्त्रे मयि विमलकृपा सर्वतो लालसीतात्
कृष्णो राधाप्रियो मां भवजलधिनिधेः किम्पचं तातरीतात् ॥ ८ ॥

कश्चिद्बर्हीभिशमो निगमपदवचः स्तूयमानः समन्ता-
दागो चेक्षीयतां मे नटवरवपुषा मानसे नानटीतात् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वाणी वादाब्जगन्धस्फुरणसुरभिता मान्द्यतां मावतीतात्
सोऽयं वृन्दावनेशो रसिकरसमुरोचाकरीतात् प्रसन्नः ॥ ९ ॥

नित्यं स्तवेन मधुरं मृदु कीर्तयन् यः
सञ्चिन्त्य पादकमलं युगलस्य धाम्नः ।
योगेन सिद्धगुरुपादपरागतृप्तः
प्रातः प्रसन्नहरिपादरजःप्रपन्नः ॥ १० ॥

(१९७८)

कामः

शुभ्रांशुकान्तमणिभिः कलितालवालाः
सञ्जातपुष्पफलभारविनम्रशाखाः ।
यस्याश्रमे सुरुचिरा विबुधद्रुकल्पा
नित्यं गृहोपवनभूमिरुहा विभान्ति ॥ १ ॥

कल्पद्रुकल्पतिलको धवलैः स्वपुष्पैः
श्यामः शुशुम्भ रुचिरैर्नवपल्लवैश्च ।
तन्निष्कुटस्तु ददृशे मुनिभिः सुदूरात्
ताराचितं ननु नभो धरणीं नु यातम् ॥ २ ॥

कामस्य काम्यनवबाणततिं प्रणिन्ये
निश्चप्रचं भ्रमरसङ्कुयुतश्च चूतः ।
यत्पल्लवैर्मसृणिताः ककुभः सरागान्
कुर्वन्ति वश्यमनसोऽपि महामुनीन्द्रान् ॥ ३ ॥

याम्यानिलेन विगलत्सुमनःपरागैः
कामोऽनलो ज्वलति शुष्कतृणैर्यथाग्निः ।
यस्मिन् निपत्य शलभा इव कामिलोका
नो किञ्चिदप्यहह चेतयितुं क्षमन्ते ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

काचिद्ददर्श बहुकण्टकयामिकानां
सङ्घेन नूनमभितः परिरक्षिताङ्गीम् ।
सत्केतकीं कुसुमगन्धविलोभिभृङ्गै-
र्भ्रान्त्या भ्रमद्भिरनिशङ्क विटैर्नु सक्ताम् ॥ ५ ॥

काचिद् द्विरेफबहुले विषपुष्पवृक्षे
सन्दीपितान् विषयुतानिव पुष्पबाणान् ।
दृष्ट्वा प्रकम्पिततरा भयभीतचिन्ता
गाढं मुनिं मदननिर्भरमालिलिङ्ग ॥ ६ ॥

विरौति चिल्ली नवकुङ्कुमाढ्या
तुषारचञ्चुः शुभमादिशन्ती ।
श्रुत्वा बचो नेत्रमखेलयच्च
हर्षप्रकर्षेण गणो वधूनाम् ॥ ७ ॥

-पार्श्वापार्श्वि सुपक्वपूगनिवहं कन्दर्पसन्दीपनीं
काश्चित् कामभुजङ्गमस्य गुटिकां संमन्वते मोहिनीम् ।
ताम्बूलव्रततीभिरत्र परिणद्धे पूगवृक्षे स्थितान्
कीरान् मारकतद्युतान् विरुतिभिर्जानन्ति मुग्धाङ्गनाः ॥ ८ ॥

सुवर्णकलशाः क्वचिन्नवपलाशपाषाणकैः
सुकल्पिततरा क्वचिन्नयनरम्यरम्भाततिः ।
कृतोर्ध्ववदनाः क्वचिन्मणिसनाथितास्तोरणा-
स्तुलां जिगमिषन्त्यलं मुनिवधूजनाङ्गश्रियाम् ॥ ९ ॥

पुष्पं मारशिलीमुखं विकसितं मत्वा तदानीं वधू-
र्दीर्घं मन्दमरन्दकेसरतरोः पुप्लोष कामज्वरे ।
फुल्लं रम्यकदम्बपुष्पसदृशं देहं स्वकीयं तथा
दृष्ट्वा कुत्रचनापि भावशबले सिन्धौ न्यमाङ्क्षीद् दृढम् ॥ १० ॥

(१९७८)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निर्वेदः

यदा क्षीणे कर्मण्यथ बहुलदोषे ह्यपगते
विशुद्धं विज्ञानं प्रथमनिजरूपे स्थितमहो ।
तदा ब्रह्मण्येवं जगदभिमतः कामनिकरः
पदार्थानां भेदो न च मतिपथे भाति विविधः ॥ १ ॥

परब्रह्मज्ञानादपगततमस्तोमनिचये
गुणातीते रूपे निरतिशयमानन्दभरिते ।
पदार्थानां भेदानथ नियतसङ्कल्पकफला-
दभेदान् जानानः सकृदपि च जीवो विजयते ॥ २ ॥

न वैवास्ते किञ्चिद् घटपटपदार्थेषु नियतं
चिदेकावच्छिन्ना त्रिभुवनपदार्थेऽष्वनुगता ।
यथा क्षीरं लोके दधिघटितनिर्माणमयते
तथा सर्वो लोकः परिणमत आत्मव्यतिकरः ॥ ३ ॥

घटः पिण्डे यद्वद्धट इच कपालं शकलिका
कपाले तस्याश्च प्रभवति हि परमाणुनिवहः ।
तथा चित्रं विश्वं विहितबहुकृत्या अपि जनाः
कथङ्कारं सत्यं बत बत वदन्तः श्रुतिचणाः ॥ ४ ॥

ऋते ज्ञानान्नैव क्वचिदपि पदार्थोऽस्ति जगति
प्रभिन्नैः स्वैश्चित्तैर्निजनिजसुकर्मादिरचितैः ।
पदार्था ज्ञायन्ते बहुगुणयुता कर्मणि चिता
यथार्थं त्वेकं सन्ननु विमलविज्ञानमचते ॥ ५ ॥

विशुद्धं तज्ज्ञानं निखिलमदलोभादिरहितं
विशोकं सन्नित्यं जननमरणादेर्विरहितम् ।
तदेवैकं सत्यं परमपुरुषः स्वात्मनि रत-
स्ततः सर्वे भावा उदयमयमाना जगति ते ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्राणानां क्षणभङ्गुरत्वमभितोऽभ्यागारिको मायिकः
स्वाप्नं जालमिवास्ति सौख्यमखिलः पुण्योदयः क्षीयते।
गान्धर्वी नगरीव मुह्यति मृषा चित्तं जगद्वल्लरी
प्राज्ञः कामयते जिहासति ततः संसारलुब्धं मनः ॥ ७ ॥

सर्वेषां ननु रक्षकोऽस्ति भगवान् भूताधिनाथः शिवः
सर्वेषां शरणं समाश्रितवतां शङ्कारकः शङ्करः।
भस्मीभूततनुर्व्यधायि मदनो येनोग्रशुक्रार्चिषा
यूयं प्राप्नुत तं सदा शरणदं मुक्त्वा जगच्छेमुषीम् ॥ ८ ॥

पुत्रः शत्रवतीह जर्जरतनौ भार्याशती द्विष्टते
पौत्रः कामयते धनं निधनमप्याशाभिलाषान्वितः।
कायः कायति काकवच्च गलितं गर्हन्ति देहं गृहे
तस्माद्ये जहति प्रबुद्धमतयः कामादिकं ते बुधाः ॥ ९ ॥

पुत्रः पुन्नरकादवेदिति पुरा सद्धर्मशास्त्रं जगौ
श्रुत्वा तत्सुतलिप्सयाऽहमगमं भार्याग्रहे मन्मतिम्।
लब्ध्वा सम्प्रति कार्यजातमखिलं धन्यात्मतां संभजन्
मोक्षे वाञ्छति मामकञ्च हृदयं वैराग्यपूर्णं परम् ॥ १० ॥

(१९७८)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीभाष्यम् विजयसारथिः

— मन्दाकिनी
(१९८०)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मन्दाकिनी

अकति मन्दाकिनी
चकति मन्दाकिनी।
तकति मन्दाकिनी
मधुरेण पूरेण ॥ १ ॥

चलति मन्दाकिनी
जलति मन्दाकिनी।
सलति मन्दाकिनी
विमलेन सलिलेन ॥ २ ॥

स्यन्दते स्पन्दते स्कुन्दते स्वर्णदी
परिवहस्यावधौ प्रेयसा स्रोतसा।
सूदते मोदते ह्लादते स्वर्णदी
परिवहस्याजिरे श्रेयसा पाथसा ॥ ३ ॥

योतते जोतते श्रन्थते स्वर्णदी
परिवहस्याङ्गणे भूरिणा वारिणा।
अंहते मंहते बंहते स्वर्णदी
परिवहप्राङ्गणे महितया धारया ॥ ४ ॥

अकति मन्दाकिनी···

वक्रताकुञ्चिता
चित्रभङ्ग्यञ्चिता।
कलनादगुञ्जिता
रसरीतिरञ्जिता ॥ ५ ॥

कविमहाकृतिरिव
प्लावयितुमुद्यता।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जगदिदं स्पन्दते
मधुरिमस्यन्दिनी ॥ ६ ॥

उल्लोलकल्पना-
कल्लोललीलया ।
हृदयकूलङ्कषा
गगनकूलङ्कषा ॥ ७ ॥

सत्त्वसम्पत्तिरिव
तत्त्वसंवित्तिरिव ।
सत्यानुभूतिरिव
नित्यसंवीतिरिव ॥ ८ ॥

सकलमपि विश्वमा-
प्लावयितुमुच्चलति ।
स्रोत्स्वरूपेण
लोकानुरूपेण ॥ ९ ॥

अकति मन्दाकिनी···

संसारसेतुरिव
जीवजीवातुरिव ।
निर्वाणहेतुरिव
निष्कामकेतुरिव ॥ १० ॥

परिवहति परिवहान्मन्दाकिनी ।
आनन्दरसधुनी मन्दाकिनी ॥ ११ ॥

कल्लते मल्लते घनवियन्मण्डले
कञ्चते काञ्चते घनतमोमण्डले ।
शल्भते गल्भते स्तनयित्नुमण्डले
त्रङ्कते वङ्कते तारकामण्डले ॥ १२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जोतते योतते ज्योतिषां मण्डले
सूदते ह्लादते सौरेऽपि मण्डले ।
श्विन्दते स्कुन्दते चन्द्रमो मण्डले ॥ १३ ॥

वह्निमण्डलमेति संविन्नदीव सा ।
फालानलसुधापूरेण स्वर्णदी ॥ १४ ॥

गोविन्दपोपूत-
पादारविन्दमक-
रन्दसन्दोहनि-
ष्यन्दिमन्दाकिनी ।
वृन्दारकानन्दसन्धायिनी
आनन्दरसधुनी मन्दाकिनी ।
आम्नायरसधुनी मन्दाकिनी ॥ १५ ॥

सन्तमससंवृताकाशवीथीस्फुर-
त्सौदामनीरोचिरुल्लोलधारेव ।
अत्यन्तमेचकस्तनयित्नुसंवृत-
व्योमविद्योतमानेरम्मदालिखी ॥ १६ ॥

निरवद्यहृद्यतरतरलतारावकाश-
तारहारप्रभावीचिरिंछोलिरिव ।
विश्वकल्याणाय वियदङ्गणा-
दवतरति शिवशिरसि मन्दाकिनी ॥ १७ ॥

विष्णुपदसंस्पृशा श्रीकरेणेव सा
विष्णुपदविभवेन हंसरुचिरेणेव ।
कुवलयेनेव बहुजीवनेनोद्यता
जीवनेनेव सुमनो मुदा धायिनी ॥ १८ ॥

शब्दशास्त्रेणेव रूपावतारगुण-
वृद्धिविस्फारेण नारायणेनेव ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वदाऽतीतागमाञ्चलव्रातेन
मृत्युञ्जयेनेव कामप्रशमनेन ॥ १९ ॥

चण्डप्रवाहेण वियदङ्गणात्
अवतरति शिवशिरसि मन्दाकिनी ॥ २० ॥

शकटास्यलालसन् मञ्जुलाकारेण
नागापसर्पितोदारस्वरूपेण ।
उद्धृत्तविभ्रमस्फीताम्बुपूरेण
एलकाक्रीडितोदञ्चत्तरङ्गेण ॥ २१ ॥

अवतरति शिवशिरसि मन्दाकिनी
लास्यरसवाहिनी मन्दाकिनी ॥ २२ ॥

मन्दीकृताकाण्डविलयाक्रियाशौण्ड-
रंहसमुच्चलितबृंहत्प्रवाहा च ।
प्रोत्तालहिल्लोलझालञ्झलाराव-
बधिरीकृताशेषहरिदन्तराला च ॥ २३ ॥

नीरन्ध्रनीरोधनिःशङ्कनिस्तोक-
निर्यन्निजप्रवाहप्लवावेगा च ।
धारावितर्कितापतितोद्धतैराव-
तादिहरिदधिपालमत्तमातगाच ॥ २४ ॥

तीव्रतरवेगेन वियदङ्गणा-
दवतरति शिवशिरसि मन्दागिनी ॥ २५ ॥

इरिणानि सस्यालवालानि वितनोति
कामलानपि जलाधारांश्च विदधाति ।
खातानि पूरयति वेशन्तवापिका-
ह्रददीर्घिकातटाकादीनि पूरयति ॥ २६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

देवखातानि किल निपृणाति निपिपर्ति
ऊष्मालवालानि विविधस्थलान्यपि ।
धाराभिरञ्जसा मन्दाकिनी
धीराभिरञ्जसा मन्दाकिनी ॥ २७ ॥

मालेषु डेडेति शैलेषु पोप्लोति
खातेषु चञ्चूर्यखातेषु चोकूर्ति ।
उच्चेषु चोस्कन्ति कच्छेषु चोस्कुन्ति
अरियर्ति गहनेषु वरिवर्ति कोणेषु ॥ २८ ॥

इरिणेषु जाहर्ति प्रवणेषु नानर्ति
जङ्घन्ति कूलानि चङ्खन्ति मूलानि ।
चाकर्ति शैत्यानि मन्दाकिनी
चरिकर्ति सुकृतानि मन्दाकिनी ॥ २९ ॥

मन्दारमालेव सुमनो मनोहरा
योगीशसंविदिव नादनिन्दूद्यता ।
विक्षेपवृत्तिरिव कल्लोलसङ्कुला
प्रतिभेव नवनवोन्मेषोपलालिता ॥ ३० ॥

पुरुहूतनगरीव महितामृतश्चिता
सुरधेनुरिव पयस्स्रोतःपिचण्डिला ।
राजते भारते मन्दाकिनी
भ्राजते भारते मन्दाकिनी ॥ ३१ ॥

आशयेनाच्छेन शुचिना गभीरेण
सम्भ्रमेण प्रकृतिसौभाग्यपोषिणा ।
त्रैकाल्यफलदायकेन प्रचारेण
जीवनेनाश्रान्तकविसेव्यमानेन ॥ ३२ ॥

राजन्यमूर्त्तिरिव मन्दाकिनी
रञ्जयति भूतलं मन्दाकिनी ॥ ३३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वासयन्ती वृषं भासयन्ती त्विषं
पावयन्ती भुवं भावयन्ती जवम्।
दूरयन्ती छलं पूरयन्ती बलं
शोषयन्ती रुजं पोषयन्ती निजम्॥ ३४ ॥

एति प्रयागं च मन्दाकिनी
मानयति माधवं मन्दाकिनी ॥ ३५ ॥

रमणीययेवेन्द्रनीलोत्पलत्विषा
सामिनीलीकृता स्फटिकोपलस्थली ।
वामार्धमूर्तिं प्रपन्नया गिरिजया
शम्भोरुपस्कृता दक्षिणामूर्तिरिव ॥ ३६ ॥

छायामहीरुहाधस्तलनिलीनया
ज्योत्स्नातमोरेखेष्वेव शारीकृता ।
समलङ्कृता विनीलाकाशशोभया
शारदस्तनयित्नुमालेव मञ्जुला ॥ ३७ ॥

यमुनया सङ्गता मन्दाकिनी
विद्योततेतरां मन्दाकिनी ॥ ३८ ॥

(१९८०)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हर्षदेवमाधवः

— अन्धकारः
(१९७९)
— वृक्षाः
(गझलकाव्यम्)
(१९७९)
— चतुष्के कवेः प्रतिमां दृष्ट्वा
(१९७९)
— अत्रान्तरे
(१९८०)
— उष्ट्रः
(१९८०)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अन्धकारः

सुवाच्या खलु कौमुदीलिपि-
र्यतो हि
तस्यास्तिर्यग्गतिः समुद्रवेलायाः
आकारः पारिजातस्य
अनुस्वारः सितहिमजलानां
अर्थोऽस्ति कोमलतायाः
विशेषणानि रमणीयतायाः ।
किन्तु,
सुमेरियन्-संस्कृति-लिपि-समोऽयम्
अयाचित एव अद्यापि
कस्मात्?
त्वया व्यञ्जना तस्मै
तव नेत्रतारकयोः,
केशकलापस्य कुटिलता,
चिबुकश्यामबिन्दोः सूक्ष्मता,
नेत्रकज्जलस्य तिरश्चीना अभिव्यक्तिः
रोमाञ्च व्यापकत्वम् ।
चन्द्रिका वाचाला
तव सखीसभा
मौनव्रतं गृहीत्वा तिष्ठति
तव मूकभाववत्
असह्योऽयम् अन्धकारः ।

(१९७९)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृक्षाः
(गझलकाव्यम्)

वने नहि निवसन्ति वृक्षाः
वनमेतद् रचयन्ति वृक्षाः ।
'कुत्र गतस्त्वं'-रात्र्यामन्धाः
इति ध्वान्ते पृच्छन्ति वृक्षाः ॥ १ ॥

शाखा दोलाऽऽसीना विहगाः
मधुरं किमपि स्वनन्ति वृक्षाः ।
श्वसन्ति पर्णैरिदमाश्चर्यं
पादैर्जलं पिबन्ति वृक्षाः ॥ २ ॥

पदैः स्पृशन्ति पातालञ्च
नभः शिरस्सु वहन्ति वृक्षाः ।
पयोदर्पणे प्रतिबिम्बितानि
कौतुकेन पश्यन्ति वृक्षाः ॥ ३ ॥

प्रसार्य स्वच्छायासंस्तरणं
सत्कारं कुर्वन्ति वृक्षाः ॥ ४ ॥

(१९७९)

चतुष्के कवेः प्रतिमां दृष्ट्वा

तद् हास्यम्,
तन्निर्दोषं मुखम्,
तदेव नेत्रमाधुर्यम्,
स एव ग्रीवाभङ्गः,
तदेव विशालसमुदारं वक्षःस्थलम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किन्तु,
कुत्र नु खलु कविहृदयम्?

(१९७९)

अत्रान्तरे

भुवि पतति
तरुशाखाजालेभ्यः
जीर्णचन्द्रमाः ।

शुकरूपेण
वृक्षात्मा पलायते
तक्षकं दृष्ट्वा ।

शुक्रनिनादं
स्मृत्वा छिन्नपादपः
पुनः प्ररूढः

(१९८०)

उष्ट्रः

उष्ट्रच्छायासमं रणम्,
उष्ट्रनेत्रसमाः सिकताः,
उष्ट्रकण्ठनिभो दिनकरः,
उष्ट्रबुभुक्षावत् सूर्यातपः,
उष्ट्रपदवत् पर्यटकाः,
उष्ट्रपुच्छमिव जलदर्शनम्,
उष्ट्रोदरजलसञ्चय इव जिजीविषा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रश्मिबद्धं उष्ट्रमुखम्
भूयाच्चेन्मुक्तम्
अश्नुयात् रणमपि ।

उष्ट्रच्छाया
निदाघे पल्वलायते ।

उष्ट्रस्य जीवनरेखा रणम्,
उष्ट्रस्य लग्नस्थाने सूर्यातपः,
उष्ट्रस्य अष्टमे स्थाने मृगतृषा,
उष्ट्रस्य षष्टिलेखे
विधात्रा लिखिताः
खर्जुरबर्बुरथुवराः ।

शिशुनेत्रशीतलरणद्वीपेषु
आगता "आरबरात्री"-कथानाम्
उष्ट्राः ।

उष्ट्रमुखे नासीत् तुलसीपत्रम्
नासीद् गङ्गाजलम्,
केवलमासीत् तृषा ।
अक्ष्णोः मुष्टिमुद्घाट्य पलायितं
रणम् ।

सार्थवाहो गतः,
पदचिह्नानि मृष्टानि वायुना ।
क्षितिजोऽपि धवलिताश्चन्द्रिकया
सिकतानिकरे ब्रूडित उष्ट्रः
चन्द्रमसि
निषीदति कलङ्कच्छलेन ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सूचिरन्ध्राद् उष्ट्रोऽपि
निर्गच्छेदिति बाइबिलवचनं
श्रुत्वा मया दृष्टं
तदा
उष्ट्रः सूचिरन्ध्रान्
मम नेत्रयोः प्रविष्टः ।

उष्ट्रस्य पदेषु
सिकतानां नूपुरम्,
उष्ट्रस्य कण्ठे किङ्किणीमाला
मृगतृष्णायाः,
धूलीस्तम्भानां भवनानि,
बर्बुरथुवराणां मिष्टान्नम्,
उष्ट्रेण लब्धः
सुखनाम प्रदेशः

(१९८०)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

केशवचन्द्रदाशः

— प्रतीक्षा
(१९७९)
— विहङ्गमः
(१९८०)
— समाधिः
(१९८०)
— प्रभातपतत्रिस्वरः
(१९८०)
— आस्वादः
(१९८०)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रतीक्षा

सन्ध्याऽऽयाति सीमन्तिनीकलसेषु
भिक्षुतनयस्य रोदनमपह्नोतुम्
हतशेष इन्द्रधनुः निलीयते
दूरदिग्वलये........
लक्ष्यहीनश्चक्रवाको विलपति
पुलकिततनुः........
अपसृतभावनावीचिषु
शब्दायन्ते गतायुषो वासराः ।
आत्मानं च घ्नन्ति 'चाय'-पात्रे
क्षुधाया अश्रूणि ।
विप्लविनः शङ्खध्वनिः विनश्यति
हताशकन्दरे
वेदनाया लिपितले स्खलति च
आयुषः केशरम्
विभज्यते कोमलमनसः
पतत्रिणी-वसति-शान्तता
अनुसृत्यापि त्वदीयसरणिम्
तथापि न दृश्यते
मरुनिर्झरिणी ।

(१९७९)

विहङ्गमः

नयने मे
श्यामलभूरुहनिकरे,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गन्धहीना कुसुमवीथिका,
मनोहरं महाकालफलं
छायातले रक्ताक्तजीवनम्
पर्युषितं जीवने केवलम्।
नूतनतपनकिरणे
उज्जीविताः सुदीर्घपादपाः
सौदामनीपरीरम्भसक्ताः,
परमितो भूतलशायिनो
लघुदूर्वादयः
अभीप्सन्ति चिरशयनीयं
स्तोकमपि वारिबिन्दुं विना।
धवलप्रासादपटले
विजृम्भते उन्मुक्तचुल्लिका,
धूमोद्गारे निक्षिपति सहस्रहृदयम्,
रक्तहासे तस्या मानवता गगनमुपैति।
विहगि रे, गतं त्वया
मत्तो बहुदूरम······· ।
दोलायते मम मनोद्वारे
निर्जीवम् उन्मुक्तपिञ्जरम्
महाशून्ये परिक्रम्य एवम्
अहमेकः क्लान्तविहङ्गमः।

(१९८०)

समाधिः

पुनश्च पुण्यानि पापानि
मिलितानि अत्रैव केवलम्।
नवघासाः साक्षिणः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

समाधिरक्षिणः
'रक्तं देहि...... रक्तं देहि......' आह्वाननिचयम्,
चिन्तामग्नसुवीरस्य श्वासः,
उपगुप्त-सन्यासि-वचनम्,
म्लानापीयं शान्तेश्च पताका
श्रावयति अवसन्नमितिहासमत्र
विशुष्कपर्णेषु........ ।
आलिङ्गनमुद्राबन्धे भोगस्य लाञ्छनम्
प्रणयसुमनसि निमीलितफलम्,
वहन्त्यपि प्रणयिनी स्मितविजयिनी
प्रोञ्छतीह अधरपुलिनात्
स्मितावलीमञ्जलिमञ्जलिम्,
निरन्नस्य अस्थिसारो देहः
नदतीह 'मुक्तिः मुक्ति' रिति,
बलात्कारं नयति कुक्कुरः
मातुरङ्कात् सद्योजातशिशुम्,
गोष्पदेषु पिबन्ति सलिलम्
अत्र मम पितृपितामहाः ।
जीवनं मे समाधिस्थमद्य
नवसभ्यसमाजस्य
उच्छिष्टभक्षणे ।
नीरक्षीरपरिचयक्षणे,
हे समाधे! उद्घोषय
जीवनलक्ष्यम्;
मुक्तिर्नाम मरणं केवलम् ।

(१९८०)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रभातपतत्रिस्वरः

यद्यप्यग्रे तामसदिगन्तः
पश्चाच्च स्वनिर्मितनीडस्य
अर्धभग्नवंशो दोलायते,
यद्यपि श्रूयते द्वारदेशे
अन्धाया याचनस्वनिमा
अजाशिशुश्च आजिघ्रति
देहलीषु तेलिनीनां भस्म,
तथापि न मे स्वरोऽवनतः
ह्रियतां कामं मे आत्मसंज्ञा
जीवनविवर्त्ते
तथापि रोहयामि ध्वजदण्डमिमं
नूतनजाग्रतेः
प्रभातपतत्रिणः
तरुणिमस्वरे
आषाढकुसुमानां
दारुणमरणस्थले
लोहितभूतले

(१९८०)

आस्वादः

यद्यपि आशाया निर्घाततरङ्गे
अपहृता दृष्टिरद्य
तथापि हिंमखण्डधारे
वह्निकणधारे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कलिः जानाति केवलं
पुष्पीभवने को वा स्वादः?
पुष्पमपि विजानाति
म्लानतायां कियती वेदना,
वैशाखस्य स्वेदिष्णुमध्याह्ने
कर्षको जानाति
परिश्रममूल्यम्,
प्लवमानो मेघोऽपि जानाति
आकाशदूरताम्—
अहं वा कथं न जानीयां
मदवधिं
मदीयपरिधिंम्?

(१९८०)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

APPENDIX

BIOGRAPHICAL SKETCHES OF THE AUTHORS

1. V. RAGHAVAN was born at Thiruvanur in Thanjavur Distt., Tamilnadu on 22nd August 1908. He was very keen for traditional Sanskrit learning, from the Pundits and artistes of his village. He graduated from the Presidency College, Madras, with Honours in Sanskrit. His talents developed under the supervision of Mahamahopadhyaya Kuppuswami Sastri. After passing M.A. with five gold medals, he started his career as a researcher at the University of Madras from 1931 and from 1939 and served this institution on various teaching posts. Having attained superannuation, he worked as Jawaharlal Nehru Fellow of Jawaharlal Nehru University, New Delhi.

Raghavan very actively co-operated with several institutions working in the field of Sanskrit learning, Music and performing Arts. He served as Secretary to the Music Academy of Madras. He himself founded Sanskrit Ranga for promotion of Sanskrit theatre. He edited *Oriental Research Journal* (Madras), *Music Academy Journal, Saṃskṛta Pratibhā; Saṃskṛta Raṅga,* the *Malaya Maruta* series and was associated with various other periodicals.

The awards or honours received by him make a long list. They include Padmabhushan in 1962 and the Sahitya Akademi Award on his thesis on *Bhoja's Śṛṅgāraprakāśa* in 1966 and honorary D.Litt. from Sanskrit University of Varanasi.

A versatile author, he wrote in English, Sanskrit and Tamil and is remembered as a scholar *par excellence.* His creative writings in Sanskrit include 12 plays, one Mahākāvya and a large number of lyric poems.

2. BIRENDRA KUMAR BHATTACHARYA was born at Silhet (now in Bangladesh) in 1917. Having passed B.A. Honours from University of Calcutta in 1937, he successfully competed for the ICS, IA and AS Exams. He passed M.A.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

in Philosophy in 1940 and was awarded D.Litt. in 1949. He taught Philosophy at St. Paul's College, Calcutta from 1942 to 1949, after which he joined the Indian Administrative Services as an emergency recruit and served the Govt. of India and the West Bengal Govt. in various capacities, and finally dealt with the influx of Bangladesh refugees as Rehabilitation Commissioner.

Author of two philosophical treatises in English and ten poetical works in Bengali. Bhattacharya switched over to Sanskrit as a medium for his creative writings from 1967. His publications in Sanskrit include 12 plays, a translation of Omar Khayyam, and a collection of Sanskrit sonnets. He is perhaps the first poet to attempt sonnet in Sanskrit. Some of his dramatic pieces depict contemporary situations. He died on 25th October, 1982.

3. Batuknathshastri Khiste was born on 30th November, 1918. His father Pt. Narayan Shastri Khiste was one of the most celebrated pundits of Kashi. He was educated under the guidance of the greatest traditional scholars of that time, like Mahamahopadhyaya Damodarlal Goswami, Pt. Bhalchandra Shastri and his own father. He served as teacher at Sampurnanand Sanskrit University, Varanasi, for about three decades and retired as the Professor and Head of the Sahitya Deptt. He is very popular for thousands of Sanskrit verses composed on different occasions, which appeared in some periodicals.

4. Ratinath Jha was born at the Basti village, (Talapurava Distt., in Uttar Pradesh, on 15th August, 1922. He came to Varanasi for Sanskrit studies and was considered to be one of the best products from Varanasi. He passed Vyakaranacharya, Vedantashastri, Sahityaratna, Sahityācharya and M.A. and was honoured with the title of Panditaraja by the Pandit-Parishad of Kashi. He served in the Purana Deptt. of the Faculty of Oriental Learning at Banaras Hindu University. He edited and translated a

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

number of Sanskrit texts. His Sanskrit writings include *Śrīmadanamohanamālavīyaśatakam*, *Mahātmagāndhiśatakam*, *Bāpūśatakam*, *Aravindaśatakam*, *Mahāvīrābhyudamahākāvyam* and various lyric poems.

5. UMASHANKAR SHARMA TRIPATHI was born at the village of Singhra, (Deoria Distt., Uttar Pradesh) on 1st January 1922. He obtained degrees in English and Sanskrit with Sahityacharya and Ph.D. He was specially trained in oriental learning by his father, late Pt. Ramnaresh Mani Tripathi. He taught English at Kashi Vidyapith for well over thirty years. He had completed the voluminous mahākāvya *Kṣatrapaticaritam* by 1963, and also regularly contributed to some of the Sanskrit periodicals. Among his writings in Sanskrit, mention may be made of *Omarakhayyamabhaṇiti* (translations in *mandākrāntā* metre). *Sūktāmṛtam* (translations of 500 sayings by Gandhiji), *Aham Rāṣṭrī* (poems on national leaders), *Bhāratīgītam* (collection of songs) and *Rasabhāratī* (poems of humour). He also wrote in Hindi and English. He expired on 8th November, 1982.

6. M.G. MAINEKAR was a life member of Deccan College Educational Society, and he served as the Principal of Furgusson College, Poona from 1964 to 1968, after which he came to University of Delhi as Professor and Head of its Sanskrit Deptt. From October 1969 to March 1978 he served as Professor and Head of Sanskrit Deptt. at the University of Bombay. He is author of several scholarly works and two poems in Sanskrit.

7. SHRIDHAR BHASKAR VARNEKAR was born on 31st August 1919. He was educated in Sahitya, Vyakarana and Vedanta and served as the Professor in Sanskrit Deptt. Nagpur University. He was awarded D.Litt. by Nagpur University on his thesis *Arvācīna Saṃskṛta Sāhitya*. He is the founder editor of *Rāṣṭraśakti*, a Marathi weekly. He also edited *Saṃskṛta Bhavitavyam*, weekly. His publication in Sanskrit

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

include *Mandormimālā* (collection of poems), *Mahābhāratakathāḥ*, *Bhārataratnaśatakam*, *Svātantryavīraśatakam*, *Kālidāsarahasyam*, *Rāmakṛṣṇaparamahamsīyam*, *Vātsalyarasāyanam*, *Śivarājyodayam Mahākāvyam*, and *Vivekānandavijayam Nāṭakam*.

8. REWA PRASADA DWIVEDI was born at Nadner near Bhopal in Madhya Pradesh on 22nd September 1935. He came to Varanasi for higher studies and then served in the government colleges of Madhya Pradesh for seven years, after which he joined as the Reader in the Faculty of Oriental Learning at Banaras Hindu University in 1970 where he is now working as a Professor. He was awarded Ph.D. from Raipur in 1965 and D.Litt. from Jabalpur in 1974. He was honoured by the President of India for traditional Sanskrit learning in 1978. Besides *Sītācaritam* (a *mahākāvya)* and *Yuthikā* (a play based on *Romeo and Juliet* in Sanskrit), his writings include a large number of scholarly publications.

9. K. RAJANNA SHASTRI was born at Dharmapuri, Karimnagar, Andhra Pradesh on 2nd June 1933. Having obtained post-graduate and research degrees in Sanskrit and Telugu, he is at present working as a lecturer in the Deptt. of Telugu, Osmania University, Hyderabad. He has published several books of his Sanskrit poems. His Sanskrit play *Vasumatī-sudhākaram* was broadcast by AIR, Hyderabad.

10. JAGANNATH PATHAK was born at the village Sahasaram, Bihar, on 2nd February 1934. He came to Varanasi for studies where his poetic talents found expression through Sanskrit. Even in student life, he came to be recognised for his *Rubait*-oriented couplets in Sanskrit, which went on multiplying to a few thousands by the time his first collection of selected poems came out in 1980 for which he was given Sahitya Akademi Award. *Mṛdvikā*, his

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

second anthology was published in 1983. *Pipāsā (1986)* is a collection of his Sanskrit *ghazals*. Pathak is noted for creating new trends in modern Sanskrit poetry. His poetry breaths in tenderness of feelings, universal love and sublimation of earthly sentiments to divinity. He also writes in Hindi, and mention may be made of his *Patralekhā ke Patra* (letter by Patralekhā, a character in Bāṇa's *Kādambarī*). He has also translated a number of Sanskrit texts. At present, he works as the Principal of Kendriya Sanskrit Vidyapith at Jammu.

11. RAMKARAN SHARMA (b. 20.3.1928) has learnt Sanskrit on both traditional and modern lines. He holds the degrees of Vedanta-Nyaya-Vyakarana-Shastri, Sahityacharya, Ph.D. and is FRAS also. He has served as Educational Adviser under the Ministry of Education, Govt. of India; as Director of Kendriya Sanskrit Vidyapith, Tirupati; and as Vice-Chancellor of two Sanskrit Universities at Darbhanga and Varanasi and also as Director of Rashtriya Sanskrit Sansthan, Delhi. He was invited as Visiting Professor by the universities of Columbia and Chicago. He composed some Sanskrit poems during the early years of his life on national freedom movement. His first published poem in Sanskrit was 'Tulasīdāsa' in *Vaiśālī* (1943) to be followed by some portion of *Madālasā* (1955). *Saṃskṛta Pratibhā* published some of his poems. He has authored a number of research works, and has so far published three collections of his Sanskrit poems together with a prose romance. He received the Sahitya Akademi Award, in 1989 for his Sanskrit poetry.

12. RAJENDRA MISHRA (b. 1944) works as the Reader in Sanskrit Department of Allahabad University. He was invited as a Visiting Professor at Udayan University, Bali, where he served for two years. He received eight awards from the Govt. of Uttar Pradesh for his literary works in Sanskrit between 1962 and 1986. A versatile author, he

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

writes in Sanskrit, Hindi and Bhojpuri; and has produced about 45 works comprising his studies on Sanskrit literature, and mostly his creative writings in various forms—drama, one-act plays, short stories, lyrics and epic poems. He received the Sahitya Akademi Award for his collection of short stories in Sanskrit, *Ikṣugandhā* in 1988.

13. Rasikavihari Joshi is the son of Pt. Rampratap, a great Sanskrit scholar and poet, who later on became a *sannyāsin*. Shri Joshi studied at Varanasi, and has served as the Professor in the Sanskrit departments of Jodhpur and Delhi universities. He has travelled extensively through the continent on foreign assignments. He has composed an Epic poem *Mohabhaṅgam* which is based on the story of Saubhari in *Viṣṇupurāṇa*, while his *Karuṇākaṭākṣalaharī* breathes in devotional fervour for Rādhā.

14. Shribhashyam Vijayasarathi was born at Chegurthi village in the Karimnagar Distt., Andhra Pradesh on 10th March 1936. He has been teaching at SVSA College, Warrangal, since 1956. He has 19 poetic works in Sanskrit published to his credit, out of which portions from *Mandākinī* (1980) were recited by him on several occasions all over the country. He has published 13 poems, two novels and one play in Sanskrit. He received the Andhra Pradesh Sahitya Academi Award for his poetry in 1981. His poetry presents a rare combination of subtle imagery, erudition and scholastic designs. He has brought folk-tunes and Telugu metres to Sanskrit poetry.

15. Harshadev Madhav was born on 20th October 1954. His father expired when he was seven. He worked in a telegraph office at Palitana (Gujarat) but continued his studies privately and passed M.A. in Sanskrit standing first class first. At present he works as a lecturer in Sanskrit at H.K. Arts College, Ahmedabad. He has composed about 2200 poems in Sanskrit, some of which are collected in

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Rathyāsu Jambūvarṇānām Śirāṃ (1985). Since 1975 he has been a regular contributor to a dozen of Sanskrit periodicals. He also writes poems in Gujarati and a collection of his Gujarati poems *Hath Phaphole Andhala Sugandhane* has been published. English translations of his Sanskrit poems have appeared in *The Poet* (USA), *Indian Literature*, *The Skylark* and *Poetry*.

16. KESHAB CHANDRA DASH was born at the village Hatsahi, Cuttuck Distt., Orissa on 6th March 1955. Having obtained M.A.,M.Phil. and Ph.D. degrees in Sanskrit, he trained himself in traditional learning by passing Vyakaranacharya and Vyakarana-parangata exams. He also passed Ratna course in Hindi and Diploma courses in German, French and Film-direction. Recipient of various awards and honours, he received Film Development Corporation's script award in 1983. His publications in Sanskrit include ten novels, two collections of short stories comprising a total of ninety stories; two books for children and five collections of poems. He has also been writing in Oriya and English.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

APPENDIX

BOOKS AND PERIODICALS CONSULTED

1. *Ajasrā* (Monthly); Akhil Bharatiya Sanskrit Parishad, Lucknow.
2. *Utkalodayaḥ* (Quarterly); Sanskrit Prachar Parishad, Ved Vyas, Rourkela, Orissa.
3. *Kavibhāratīkusumāñjaliḥ* (Annual); Kavibharati, Varanasi.
4. *Kāpiśāyanī*: Jagannath Pathak; Ganganath Jha Kendriya Sanskrit Vidyapith, Allahabad, 1980.
5. *Kṣatrapaticaritam*: Umashankar Sharma Tripathi; pub. by Mihirmani Tripathi, 68, Teacher's Quarters; Kashi Vidyapith, Varanasi.
6. *Digdarśinī* (Monthly); Utkal Sanskrit Research Society, Puri.
7. *Mandākinī*: Shribhashyam Vijayasarathi; Sanskrit Bharati; SVSA College, Warrangal, 1980.
8. *Vāṇīvilasitam*: Ed. by Jagannath Pathak & Kishor Jha; Kendriya Sanskrit Vidyapith, Allahabad, 1978.
9. *Śivarājyodayam*: Shridhar Bhaskar Varnekar; Sharada Gaurav Granthmala, Poona, 1972.
10. *Śramagītā*: Shridhar Bhaskar Varnekar, Sharada Gaurav Granthamala, Poona, 1977.
11. *Sāgarikā* (Quarterly); Sagarika Samiti, Sagar.
12. *Sītācaritām*: Pub. in *Sāgarikā* VII.1; 1965; subsequently issued on book-form. Second edn. with Hindi translation published from Varanasi.
13. *Sudharmā*: (Daily); Mysore.
14. *Sumanoñjaliḥ* K. Rajanna Shastri. Pub. by the author from Dharampuri, Karimnagar, 1973.
15. *Sūryodayaḥ* (Monthly); Bharat Dharma Mahamandala, Varanasi.
16. *Viśvasaṃskṛtam* (Quarterly); Vishveshvaranand Vedic Sansthan, Hoshiarpur.
17. *Saṃskṛta Pratibhā* (Half-yearly); Sahitya Akademi, New Delhi.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

18. *Saṃvit* (Quarterly); Bharatiya Vidya Bhawan, Bombay.
19. *Kalāpikā*: B.K. Bhattacharya, Calcutta, 1969.
20. *Arvācīna-Saṃskṛtaṃ* (Quarterly); Devavani Parishad, Delhi.
21. *Sarvagandhā* (Monthly); Lucknow.
22. *Abhinavasurabhāratī*; Kanpur (no. 1 published in January 1977).
23. *Mohabhangama* Rasikavihari Joshi; University of Jodhpur, 1978.
24. *Karuṇākaṭākṣalaharī*: Rasikavihari Joshi; Varanasi, 1977.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

APPENDIX

SOURCES OF THE POEMS

1. किमिदं तव कार्मणम् **संस्कृतप्रतिभा**, VII. 1, 1967.
2. अन्यापदेशाः *Ibid*, VIII.2.1970.
3. अयोगयोगः *Ibid*, IX.1.1971.
4. वाग्वादिनी सहस्रतन्त्रीः **सूर्योदयः**, Feb., 1971.
5. पुलकमेति कश्चित् कविः **संस्कृतप्रतिभा**, XI. 1-2, 1976.
6. तनुतीर्थम् ***कलापिका***, P. 4.
7. आविर्भावः *Ibid*, P.5.
8. हृतसर्वस्वः *Ibid*, P.19.
9. युगकविः **संस्कृतप्रतिभा**, IX. 2,1972.
10. मेघदूतम् *Ibid*, IX. 2, 1972.
11. वर्षाललन्तिकाः *Ibid*, XI.1-2.1976.
12. वसन्तविभावरी **सूर्योदयः**, March, 1965.
13. जयत्यसौ वसुन्धरा *Ibid*, August, 1965 .
14. भागीरथीपद्यपुष्पाञ्जलिः *Ibid*, May, 1965.
15. आत्मनिवेदनम् *Ibid*, Nov., 1965.
16. प्रभातलक्ष्मीः *Ibid*, March, 1970.
17. कृष्णमेघः *Ibid*, August, 1972.
18. शरदिन्दुमुखी **वाणीविलसितम्**, 1978.
19. घनं प्रति **संस्कृतप्रतिभा**, VII.1, 1967.
20. सुभाषितानि *Ibid*, 1968.
21. मेघमाला **सूर्योदयः**, June, 1969.
22. कौमुदी *Ibid*, Nov., 1972.
23. मुक्तिवाहिनी **कविभारतीकुसुमाञ्जलिः**, Part V, 1972.
24. हिमागमः **सूर्योदयः**, October, 1973
25. चन्द्रः प्रवालप्रभः **वाणीविलसितम्**, 1978.
26. स्मृतितरङ्गम् **स्मृतितरङ्गम्**, 1975.
27. गायिकाशिल्पकारम् **गायिकाशिल्पकारम्**, 1980.
28. अस्पृश्यान्तर्निवेदितम् **विश्वसंस्कृतम्**, August, 1967.
29. चक्रिचूडामणिः **सूर्योदयः**, April, 1968.
30. कृषकः *Ibid*, March, 1971.
31. मधुकर! ते दिवसा विगताः *Ibid*, Nov., 1973.
32. सैन्यप्रयाणम् **क्षत्रपतिचरितम्**, V. 68-90, 1974.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

33. वसन्तः *Ibid*, VI. 18-28, 1974.
34. युद्धवर्णनम् *Ibid*, IX. 20-38, 1974.
35. रामदासः शिवराज्योदयम्, II. 26-50., 1972.
36. जिजा *Ibid*, IV. 8-13, 1972.
37. निदाघः *Ibid*, IV. 27-47, 1972.
38. श्रममाहात्म्यम् श्रमगीता 1977.
39. श्रमयोगः *Ibid*, 1977.
40. प्रतीक्षा 1964
41. सीतापरित्यागः सीताचरितम्, III. 1968.
42. सीताप्रस्थानम् *Ibid*, IV. 1968.
43. सीतामहाप्रयाणम् *Ibid*, X. 1968.
44. शिवचतुर्दशी संस्कृतप्रतिभा, VIII.2, 1969.
45. मातुः स्तुतिः वाणीविलसितम्, 1978.
46. सायम् सुमनोञ्जलिः, 1973.
47. बलिपुष्टविलसितम् सागरिका, I.2. 1963. & सुमनोञ्जलिः ।
48. परपुष्टदशकम् संस्कृतप्रतिभा, III. 1 & सुमनोञ्जलिः ।
49. मेघमाला कविभारतीकुसुमाञ्जलिः, Part I, 1968.
50. किञ्चिद् विकीर्णमुच्छ्वसितम् संस्कृतप्रतिभा, IX.2, 1972.
51. धीराः क्षणम् वाणीविलसितम्, 1978.
52. कापिशायनी *Ibid*, 1978.
53. गझलगीतम्-1 कापिशायनी, 1980.
54. गझलगीतम्-2 *Ibid*, 1980.
55. रुबाईगीतानि *Ibid*, 1980.
56. न वेद्मि तावत् किमहं प्रतीक्षे संस्कृतप्रतिभा, 2-1, 1961.
57. अमूर्त्तं किमप्यस्ति मित्रं मदीयम् *Brochure*, 1970.
58. कविर्बुभूषामि संस्कृतप्रतिभा, 3-II, 1961.
59. जिज्ञासा मे जायतां नावबोधः *Brochure*, 1970.
60. मुषितस्तथापि वरानने! अभिनव भारती, No. 1, January, 1977.
61. आलोचयन्ति येऽपरम् सर्वगन्धा, May-June, 1978.
62. वाचिकं ददे कस्मै? सूर्योदयः, March, 1979.
63. को भणतु महिमानम्? अर्वाचीनसंस्कृतम्, March, 1980.
64. करुणाकटाक्षलहरी करुणाकटाक्षलहरी, p. 1-6.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

65. भक्तिः **मोहभङ्गम्,** p. 9-10, 1978.
66. कामः *Ibid*, p. 55-56, 1978.
67. निर्वेदः *Ibid*,p. 90-91, 1978.
68. मन्दाकिनी **मन्दाकिनी** 1980.
69. अन्धकारः **संस्कृतसाहित्यपरिषत्पत्रिका,** April, 1979.
70. वृक्षाः **संवित्,** May, 1979.
71. चतुष्के कवेः प्रतिमां दृष्ट्वा **संवित्**, May, 1979.
72. अत्रान्तरे **संवित्,** May, 1980.
73. उष्ट्रः **अजस्रा,** July, 1980.
74. प्रतीक्षा 1979 **दिग्दर्शिनी,** April, 1979.
75. विहङ्गमः **सुधर्मा,** 12.4.80.
76. समाधिः **उत्कलोदयः,** May, 1980.
77. प्रभातपतत्रिस्वरः **सुधर्मा,** 22.8.80.
78. आस्वादः *Ibid*,22.2.80.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

The editor, Professor Radhavallabh Tripathi (*b.*1949) has already established himself as a successful teacher of Sanskrit literature, besides being known as a writer in Sanskrit. He is a recipient of the Madhya Pradesh Government prizes and is Professor and Head of the Department of Sanskrit at Doctor Harisingh Gour Vishwavidyalay (Formerly University of Saugar), Sagar

Dr. Urmila Sharma Collection Varanasi

ISBN 81-7201 200 4

CC0. In Public Domain, Digitizagtion by eGang

A Critical Inventory of Rāmāyaṇa Studies in the World
Vol.I (1991) Ed. K. Krishnamoorthy pp. lxxv, 515;
ISBN 81 7201 100 8 Rs. 250.

The present volume includes information on various editions of Vālmīki's *Rāmāyaṇa* along with its several commentaries and translations. Besides, other versions of the *Rāmāyaṇa* both in Sanskrit, in the regional languages, adaptations and translations, as well as creative works based on the Ramayana theme—including poetry, drama, ballads, hymns and songs, find a place in this volume. This is a joint project of Sahitya Akademi and the Union Académique Internationale, Bruxelles.

Dr. Urmila Sharma Collection, Varanasi